अष्टापदशैल (कैलाश) पर जिस तरह भरत चक्रवर्तीने जिनालयोंका निर्माण कराया, उसी तरह साह नानूने भी सम्मेदशैल पर निर्वाण प्राप्त बीस तीर्थंकरोंके मन्दिर बनवाए थे और उनकी अनेक बार यात्रा भी की थी।

भट्टारक ज्ञानकीर्तिने सोमदेव, हरिषेण, वादिराज, प्रभंजन, धनंजय, पुष्पदन्त और वासवसेन आदि विद्वानोंके द्वारा लिखे गए यशोधर महाराजके चरितको अनुभव कर स्वल्पबुद्धिसे संक्षिप्तरूपमें इस ग्रन्थकी रचना की है। ग्रन्थकी आद्य प्रशस्तिमें भ० ज्ञानकीर्तिने अपनेसे पूर्ववर्ती उमास्वाति, समन्तभद्र, वादीभसिंह, पूज्यपाद, भट्टाकलंक और प्रभाचंद्र इत्यादि विद्वानोंका स्मरण किया है। प्रस्तुत ग्रंथ ९ सर्गोंमें समाप्त हुआ है और उसे साह नानूके नामांकित किया गया है।

—परमानन्द जैन

प्रस्तावनाकी नाम-सूची

विषय	पृष्ठ

शुद्धि-पत्र

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५	१६	चवक्रवालः	चक्रवालः
१२	२०	लिखते	लिखन्ति
१३	१८	स्मण	स्मरण
१५	१८	गुरुणामुप–	गुरूणामुप-
१६	२	यशोधरचरित	सुदर्शनचरित
१८	१५	सुगरु—	सुगुरु—
,,	१८	सकल गुणनिधैः	सकलगुणनिधि-
२२	२०	दोषैरवालोकित-	दोषैरनालोकित-
,,	२४	हु मान् (?)	महान्
२३	२४	(१८७४)	(१८८४)
२६	३	विजयनिवरत्नं	विजयिनि वररत्नं
३४	४	विश्वभूषण-विरचिते	विश्वभूषण-पट्टाभरण- जिनेन्द्रभूषण-विरचिते ।
३८	६	कर्यो	कार्यो
३९	८	कोविदः	कोविदाः
४१	१८	भुवनत्रये	भुवनत्रयम् ॥
४३	६	वृषभाङ्कित।	वृषभाङ्कितम् ।
,,	१६	संस्ते	स्तुते
४५	१४	तदा···च्छ्री	तदाज्ञया श्री
,,	२५	काव्य···जिका	काव्यपंजिका
४७	८	कवित्तमदतः	कवित्वमदतः
४९	२३	सूरिश्च···न्द्रादि-	सुरेन्द्रचन्द्रादि
५०	१४	महान ॥१७१	महान् ।
,,	३	सदा ॥१७२॥	सदा ॥१७१॥*

* इससे आगेके सब श्लोकनम्बर एक अङ्क कम जानने चाहिए ।

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५३	२०	बाल सबुद्धयै	बालसंबुद्धयै
५४	६	गुणगेय (?) कीर्त्ति-	गुणिगेयकीर्त्ति-
,,	१६	समाप्तेदं	समाप्तमिदं
५७	१०	यथागमः	यथागमम् ।
,,	२४	जयत्परं।	जयत्वरं ॥
५८	१५	(सु)	(सदा सु)
६१	१०	ग...वन	गुरुभुवन-
६३	१८	संसुतां	संस्तुतां
६७	७	मवेद्	भवेद्
,,	१५	शास्त्रेऽस्मिश्नादितं	शास्त्रेऽस्मिन् गदितं
६८	१	कनकच्चार संछायं	कनत्काञ्चनसच्छायं
,,	७	श्रीयशःकीर्त्तिरेनः (?)	श्रीयशःकीर्त्तिरेषः।
७४	१६	यश्यांशादेशेप्सित-	यस्यांसदेशे स्थित-
७६	१५	(जिनदेव)	(नागदेव)
७६	१७	यदामलपदपद्मं	यदमलपदंपद्म
७७	२५	(जिन ?)	×
८०	८	तस्माच्चि(न्त्य)तिमिदं	तस्माच्चिन्त्यमिदं
८१	२३	सिद्धाक्षरै....कैः	सिद्धाक्षरैः स्वकैः
८२	५	शिवाभिरामात्र	शिवाभिरामाच्च
८३	१३	विद्याचिणो (?)	विद्याचणो
,,	२१	समस्यलं (?)	समस्त्यलम् ।
८७	१३	परदेव तत्र (?)	परदेवताऽत्र ।
,,	१७	लक्ष्मादिचन्द्रो—	लक्ष्म्यादिचन्द्रो
८७	२३	श्रद्धाकं	श्रद्धाङ्कं
८९	१५	मंडलं	मंडलं
,,	,,	वनीसेवति (?)	वनीसेविते

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
९२	७	चित्तेनाचालमेव	चित्ते नाचलमेव
,,	८	निःकाशित	निःकाषित
,,	२२	समाप्ताः	समाप्ता
९६	२	माश्रुलभ्या (?)	माशु लब्ध्वा ।
,,	१७	सर्वै	सर्वैः
१००	१०	चम्पामिती तामिधा (?) ॥६॥	चम्पावतीत्याभिधा ।
,,	१२	वादीन्दुकं ॥७॥	वादीन्दुकम् ॥६॥*
,,	२४	दर्शज्ञान	दर्शनज्ञान
१०२	१३	वेत्ता	वेत्ता
,,	१७	चारित्र	चरित्र
१०३	११	ग्याटवाभडः	लाटवागड़ः
१०४	१०	सद्दृष्टिवन्तो (वान) ऽत्र	सद्दृष्टिवान्सोऽत्र
,,	२३	अष्टादशतार्थेन	अष्टादशतीर्थाय
१०५	८	श्रीमते (?)	श्रीमत्
,,	,,	मे दुर्रामतिः ?)	मेदुरां मतिम्
१०६	५	परमा	परया
१११	१०	गणिः	गणी
११२	८	कल्याभ्युदये	कल्याणाभ्युदये
११३	२०	स्वनादिर्ष्यति	स्वनादीर्ष्यति
१२१	६	विरहति दनिशः (?)	विहरति ह्यनिशं
,,	६	भात	भाति
,,	१७	दुर्जयदाभुयंग	दुर्जनताभुजंग–
,,	१८	कृतानागरः (?)	कृताऽऽननगरः
१२२	१६	तत्तत्त्वोसारोप	तत्तत्त्वसारोप

* इससे आगे एक अंक कम समझना चाहिए ।

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१२२	२४	गामितं मसंग्निलित् (?)	गामि-संतमससंग्लपित्
१२३	१५	गगणाऽपगाः	गगनाऽऽपगाः
१२४	१२	शुकुन	शकुन
१३५	२१	गृहिता	गृहीता
१३८	२१	सरसलिलवत्	सरःसलिलवत्
१४२	१५	प्रवर्तते (तु ?)	प्रवर्त (ताम्) ।
१४३	१७	स्वामि विनेयानां	स्वामी विनेयानां
१४५	२२	नरोचनाकातः (?)	लोचनकान्तः
१४६	१२	आसाद्यद्यु सदा [?]	आसाद्य द्यु सदां
१४८	१	मुरगोपेता	मुद्गरोपेता
१५६	१७	कृत्वा	कृता
१५८	८	तुच्छतमा (?) त्र	(खलु) तुच्छतमेन
१६०	६	शीलनिधि शलोलं (?)	शीलनिधिः सुशीला
१६३	५	घनाथ तारकाः (?)	घनाघनोऽथ तारकाः
१६४	६	वर्णालंकाहारिणी	वर्णालंकारधारिणी
१६५	६	नेमिचचन्द्रं	नेमिचन्द्रं
,,	१६	पटिय दुप्ट (?)	पटिष्ठ-
,,	१८	गमकि	गमक
,,	२२	माधवेनः सूड्वंडात्मक	माधवेन षट्खंडात्मक
१६८	८	पर्याम,	पर्याय-
,,	१४	मलमप्रतिमबोधं	ममलप्रतिमप्रबोधं
१६६	२३	ह्वाप्टे	ह्वयष्टे
१७०	१६	विशस्य ? दूरीकृतलागुण ?	विज्ञस्यादूरीकृतकलागुण ।
१७१	२२	गुरुणामवदेशो (?) न	गुरूणामुपदेशेन

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१७२	१२	आर्यंवे (?) सुरसम्प्रिये।	आर्यवर्षे सुरप्रिये
१७३	२४	विदुषो	विज्ञो यो
१७६	१३	शक्रे	शुक्रे
१७७	६	जयात्युच्चकैः (?)	जयत्युच्चकैः
१७६	१४	जिनभूतिराम्यं (?)	जिनभूतिरम्यं
१८०	२२	देवेन्द्रस्त्वद्यशः पेतुः करैः	देवेन्द्रास्त्वद्यशः पेतुः करे
,,	,,	धृत्वास्त्ववकीम् (?)	धृत्वा स्ववल्लकीम्।
,,	२३	ते	तं
१८१	५	विदो मथत् (?)	विदोऽभवन्।
१८५	२४	यत्करणौ	यत्कर्णौ
१८७	७	निर्लोडितान्यगम-	निर्लोडितान्यागमं
१८८	,,	महरिणो	महरिसिणो
१८८	११	करणाए	करुणाए
१८६	१२	तावेत्थो महीफलंमि विदिट्ठं	तावत्थेय महीयलम्मि विदिढं
,,	१५	णायरणाए (?)	णायरणाहे
१६२	१३	नामिऊण	नमिऊण
,,	१४	सव्वन्नं	सव्वण्णु
१६६	११	नवासीत्युत्तरे	नवाशीत्युत्तरे
१६८	८	विऽद्वेष	विद्वेष
२१८	१२	सदुवाक्य—	सद्गुरुवाक्य—

२२४ १५-१६ श्लोक नं० १६ दुवारा छप गया है। अतः उसे निकाल कर आगे के श्लोक नम्बर सुधार लेवें।

जैनग्रन्थ-प्रशस्तिसंग्रह

(आद्यन्तादिभागसंचयात्मक)

—❊०:❀:०❊—

१. न्यायविनिश्चय-विवरणम् (वादिराजसूरिः)

आदिभाग :—

श्रीमज्ज्ञानमयो दयोन्नतपदव्यक्तो विविक्तं जगत्
कुर्वन्सर्वतनूमदीक्षणसखैर्विश्वं वचोरश्मिभिः ।
व्यातन्वन्भुवि भव्यलोकनलिनीषंडेष्वखंडश्रियं
श्रेयः शाश्वतमातनोतु भवतां देवो जिनोऽहर्पतिः ॥१॥

विस्तीर्ण-दुर्नयमय-प्रबलान्धकार-दुर्बोध-तत्त्वमिह वस्तुहितावबद्धं ।
व्यक्तीकृतं भवतु नः सुचिरं समंतात् सामंतभद्रवचनस्फुटरत्नदीपैः ॥२॥
गूढमर्थमकलंकवाङ्मयागाधभूमिनिहितं तदर्थिनाम् ।
व्यञ्जयत्यमलमनन्तवीर्यवाक् दीपवर्तिरनिशं पदे पदे ॥३॥
यत्सूक्तसारसलिलस्नपनेन संतश्चेतो मलं सकलमाशु विशोधयन्ति ।
लंघ्यन्न यत्पदमतीवगभीरमन्यैस्ते मां पुनस्तु(न्तु)मतिसागरतीर्थमुख्याः ॥४
प्रणिपत्य स्थिरभक्त्या गुरून्परानप्युदारबुद्धिगुणान् ।
न्यायविनिश्चय-विवरणमभिरमणीयं मया क्रियते ॥५॥

विद्यासागरपारगैर्विरचितास्संत्येव मार्गाः परे
ते गंभीर-पद-प्रयोग-विषया गम्याः परं तादृशैः ।
बालानां तु मया सुखोचितपदन्यासक्रमश्चिन्त्यते
मार्गोऽयं सुकुमारवृत्तिकतया लीलाऽऽगमाऽन्वेषिणाम् ॥६॥

अभ्यस्त एव बहुशोऽपि मयैव पन्था जानामि निर्गममनेकमनन्यदृश्यं ।
तन्मामिहादरवशेन कृतप्रचारं के नामदूषणशरैः परिपन्थयन्ति ॥७॥

अथवा येषामस्ति गुणेषु सस्पृहमतिर्ये वस्तुसारं विदुः
तेषामत्र मनः प्रविष्टमसकृत्तुष्टिं परां गच्छति ।
ये वस्तु-व्यवसाय-शून्य-मनसो दोषाभिदित्सा पराः
क्लिश्नंतोऽपि हिते न दोषकणिकामप्यत्र वक्तुं क्षमाः ॥८॥

अपि च—

यस्य हृदयमलमस्ति लोचनं वस्तुवेदि सुजनस्स मद्यति ।
मत्सरेण परिमद्यते परो विद्यया तु परया न मद्यते ॥९॥

तदास्तां प्रस्तुतमुच्यते—

जयति सकल-विद्या-देवतारत्नपीठं हृदयमनुपलेपं यस्य दीर्घं स देवः ।
जयति तदनु शास्त्रं तस्य यत्सर्वमिथ्यासमय-तिमिरघाति-ज्योतिरेकं नराणाम् १०

अन्तभाग :—

श्रीमन्न्यायविनिश्चयस्तनुभृतां चेतोदृगुर्वीनलः
सन्मार्गं प्रतिबोधयन्नपि च तान्निःश्रेयसप्रापणं ।
येनाऽयं जगदेकवत्सलधिया लोकोत्तरं निर्मितो
देवस्तार्किक-लोकमस्तकमणिर्भूयात्स वः श्रेयसे ॥१॥

विद्यानंदमनन्तवीर्यसुखदं श्रीपूज्यपादं दया-
पालं सन्मतिसागरं कनकसेनाराध्यमभ्युद्यमी ।
शुद्धयन्नीतिनरेन्द्रसेनमकलंकं वादिराजं सदा
श्रीमत्स्वामिसमन्तभद्रमतुलं वंदे जिनेन्द्रं मुदा ॥२॥

भूयोभेदनयावगाहगहनं देवस्य यद्वाङ्मयं
कस्तद्विस्तरतो विविच्य वदितुं मंदः प्रभुर्मादृशः ।
स्थूलः कोपि नयस्तदुक्तिविषयो व्यक्तीकृतोऽयं मया
स्थेयाच्चेतसि धीमतां मतिमल-प्रक्षालनैकक्षमः ॥३॥
व्याख्यानरत्नमालेयं प्रस्फुरन्नयदीधितिः ।
क्रियतां हृदि विद्वद्भिस्तुदंती मानसं तमः ॥४॥
श्रीमत्सिंहमहीपतेः परिषदि प्रख्यातवादोन्नति-
स्तर्कन्यायतमोपहोदयगिरिः सारस्वतः श्रीनिधिः ।
शिष्यः श्रीमतिसागरस्य विदुषां पत्युस्तपःश्रीभृतां
भर्तुः **सिंहपुरेश्वरो** विजयते स्याद्वादविद्यापतिः ॥५॥

इत्याचार्यवर्य-स्याद्वादविद्यापति-विरचितायां न्यायविनिश्चय-तात्पर्यावद्योतिन्यां व्याख्यानरत्नमालायां तृतीयः प्रस्तावः समाप्तः । समाप्तं च शास्त्रं ।

२. धर्मरत्नाकर (जयसेनसूरि)

आदिभाग :—

लक्ष्मीं निरस्तनिखिलापदमाप्नुवन्तो लोकप्रकाशरवयः प्रभवन्ति भव्याः ।
यत्कीर्तिकीर्त्तनपरा जिनवर्धमानं तं नौमि कोविदनुतं सुधिया **सुधर्मम्** ॥१॥

अन्तभाग :—

यस्या नैवोपमानं किमपि हि सकलद्योतकेषु प्रतर्क्य-
मंत्येनैकेन नित्यं श्लथयति सकलं वस्तुतत्त्वं विवक्ष्यं ।
अन्येनान्त्येन नीतिं जिनपतिमहितां संविकर्षत्यजस्रं,
गोपी मंथानवद्या जगति विजयतां सा सखी मुक्तिलक्ष्म्याः ॥६६॥

इति श्रीसूरिश्रीजयसेन-विरचिते धर्मरत्नाकरे उक्ताऽनुक्त-शेषविशेष-सूचको विंशतितमोऽवसरः ॥

श्रीवर्धमाननाथस्य **मेदार्यो** दशमोऽजनि ।
गणभृद्दशधा धर्मो यो मूर्तो वा व्यवस्थितः ॥१॥
मेदार्येण महर्षिभिर्विहरता तेपे तपो दुश्चरं

श्रीखंडिल्लकपत्तनान्तिकरणाभ्यर्द्धिप्रभावात्तदा ।
शाट्येनाप्युपतप्तना सुरतरुप्रख्यां जनानां श्रियं
तेनागीयत झाडवागड इति त्वेको हि संघोऽनघः ॥२॥
धर्मज्योत्स्नां विकिरति सदा यत्र लक्ष्मी-निवासाः
प्रापुश्चित्रं सकलकुमुदायत्युपेता विकाशम ।
श्रीमान्सोभून्मुनिजननुतो धर्मसेनो गणींद्र-
स्तस्मिन् रत्नत्रितयसदनीभूतयोगीन्द्रवंशे ॥३॥
संजन्वादीन्द्रमानं पुरि पुरि नितरां प्राप्नुवन्नुद्यमान
तन्वन् शास्त्रार्थदानं रुचि रुचि रुचिरं सर्वथा निर्निदानं ।
विद्यादर्शोपमानं दिशि दिशि विकिरन् स्वं यशो योऽसमानं
तेभ्यः श्री(तस्माच्छ्री) शांतिषेणः समजनि सुगुरुः पापधूली-समीरः ॥४॥
यत्रास्पदं विदधती परमागमश्रीरात्मन्यमन्यत्मतीत्वमिदं तु चित्रम् ।
वृद्धा च संततमनेकजनोपभोग्या श्रीगोपसेनगुरुराविरभूत्स तस्मात् ॥५॥
उत्पत्तिस्तपसां पदं च यशसामन्यो रविस्तेजसा-
मादिः सद्वचसां विधिः सुतरसामामोन्निधिः श्रेयसां ।
आवासो गुणिनां पिता च शमिनां माता च धर्मात्मनां
न ज्ञातः कलिना जगत्सुवलिना श्रीभावसेनस्ततः ॥६॥
ततो जातः शिष्यः सकलजनतानंदजननः(कः)
प्रसिद्धः साधूनां जगति जयसेनाख्य इह सः ।
इदं चक्रे शास्त्रं जिनसमय-सारार्थ-निचितं
हितार्थं जंतूनां स्वमतिविभवाद्गर्व-विकलः ॥७॥
यावद्द्योतयतः सुधाकररवी विश्वं निजांशूत्करै-
र्यावल्लोकमिमं बिभर्ति धरणी यावच्च मेरुः स्थिरः ।
रत्नांशुच्छुरितोत्तरंगपयसो यावत्पयोराशय—
स्तावच्छास्त्रमिदं महर्षिनिवहैः स्तात्पाठ्यमानं श्रिये ॥८॥
इति श्रीसूरिजयसेनविरचितं धर्मरत्नाकरनामशास्त्रं समाप्तम् ।

३. यशोधरचरित्र (पद्मनाभ कायस्थ)

आदिभाग :—

परमानन्दजननीं भवसागरतारिणीं ।
सतां हि तनुतां ज्ञानलक्ष्मीं **चन्द्रप्रभः** प्रभुः ॥१॥

अन्तभाग :—

उपदेशेन ग्रंथोऽयं **गुणकीर्ति**महामुनेः ।
कायस्थ-**पद्मनाभेन** रचितः पूर्वसूत्रतः ॥१०७॥
संतोष-जैसवालेन संतुष्टेन प्रमोदिना ।
अतिश्लाघितो ग्रंथोऽयमर्थसंग्रहकारिणा ॥१०८॥
साधोर्विजय**सिंहस्य** जैसवालान्वयस्य च
सुतेन **पृथ्विराजेन** ग्रंथोयमनुमोदितः ॥१०९॥

इति श्रीयशोधरचरित्रे दयासुन्दराभिधाने महाकाव्ये साधुश्रीकुशराज-कारापिते कायस्थ-श्रीपद्मनाभ-विरचिते अभयरुचिप्रभृतिसर्वेषां स्वर्गगमनं (स्वर्गगमनवर्णनो नाम) नवमः सर्गः ।

जातः श्रीवीरसिंहः सकलरिपुकुलव्रातनिर्घातपातो
वंशे श्रीतोमराणां निजविमलयशोव्याप्तदिक्चक्रवालः ।
दानैर्मानैर्विवेकैर्न भवति समता येन साकं नृपाणां
केषामेषा कवीनां प्रभवति धिषणा वर्णने तद्गुणानां ॥१॥
ईश्वरचूडारत्नं विनिहतकरघातवृत्तसंहातः
चन्द्र इव दुग्धसिंधोस्तस्मादुद्धरणभूपतिर्जनितः ॥२॥
यस्य हि नृपतेः यशसा सहसा शुभ्रीकृतत्रिभुवनेऽस्मिन् ।
कैलाशति गिरिनिकरः क्षीरति नीरं शुचीयते तिमिरं ॥३॥
तत्पुत्रो **वीरमेन्द्रः** सकलवसुमतीपालचूडामणिर्यः
प्रख्यातः सर्वलोके सकलबुधकलानंदकारी विशेषात् ।
तस्मिन् भूपालरत्ने निखिलनिधिगृहे **गोपदुर्गे** प्रसिद्धिं
भुंजाने प्राज्यराज्यं विगतरिपुभयं सुप्रजःसेव्यमाने ॥४॥

वंशेऽभूज्जैसवाले विमलगुणनिधिर्भूलणः साधुरत्नं
साधुश्रीजैनपालोभवदुदितयास्तत्सुतो दानशीलः ।
जैनेन्द्राराधनेषु प्रमुदितहृदयः सेवकः सद्गुरूणां
लोणाख्या सत्यशीलाऽजनि विमलमतिर्जैनपालस्य भार्या ॥५॥
जाताः षट् तनयास्तयोः सुकृतिनोः श्रीहंसराजोभवत्
तेषामाद्यतमस्ततस्तदनुजः सैराजनामाऽजनि ।
रैराजो भवराजकः समजनि प्रख्यातकीर्तिर्महा-
साधुश्रीकुशराजकस्तदनु च श्रीक्षेमराजो लघुः ॥६॥
जातः श्रीकुशराज एव सकलक्ष्मापालचूडामणेः
श्रीमत्तोमर-वीरमस्य विदितो विश्वासपात्रं महान् ।
मंत्री मंत्रविचक्षणः क्षणमयः क्षीणारिपक्षः क्षणात्
क्षोणीमीक्षणरक्षणक्षम[म]तिर्जैनेन्द्रपूजारतः ॥७॥
स्वर्गस्पर्द्धिसमृद्धिकोतिविमलश्चैत्यालयः कारितो
लोकानां हृदयंगमो बहुधनैश्चन्द्रप्रभस्य प्रभोः ।
येनैतत्समकालमेवरुचिरं भव्यं च काव्यं तथा
साधुश्रीकुशराजकेन सुधिया कीर्तेश्चिरस्थापकं ॥८॥
तिस्रस्तस्यैव भार्या गुणचरितयुपस्तासु रल्हो भिधाना
पत्नी धन्या चरित्रा व्रतनियमयुता शीलशौचेन युक्ता ।
दात्री देवार्चनाढ्या गृहकृतिकुशला तत्सुतः कामरूपो
दाता कल्याणसिंहो जिनगुरुचरणाराधने तत्परोऽभूत ॥९॥
लक्षणश्रीः द्वितीयाभूत्सुशीला च पतिव्रता
कौशीरा च तृतीयेयमभूद्गुणवती सती ॥१०॥
शांतिर्हृशस्य भूयात्तदनु नरपतेः सुप्रजाना जनाना
वक्तृणां वाचकानां तथैव (?) ॥११॥
यावत्कूर्मस्य पृष्ठे भुजगपतिरयं तत्र तिष्ठेद्गरिष्ठे
यावत्तत्रापि चंचद्विकटफणिफणामंडले क्षोणिरेषा ।

यावल्लोकौ समस्तत्रिदशपतिवृतश्चारुचामीकराद्रि-
स्तावद्भव्यं विशुद्धं जगति विजयतां काव्यमेतच्चिराय ॥१२॥
कायस्थ-**पद्मनाभेन** बुधपादाब्जरेणुना।
कृतिरेषा विजयतां स्थेयादाचन्द्रतारकं ॥१३॥
[इति श्रीपद्मनाभ-कायस्थ-विरचितं यशोधरचरित्रं समाप्तम्]

यशोधरचरित्र (वासवसेन मुनि)

आदिभाग :—

जितारातीन् जिनान्नत्वा सिद्धान् सिद्धार्थसंपदः।
सूरीनाचारसंपन्नानुपाध्यायांस्तथा यतीन् ॥१॥
जनन्या समवेतस्य **यशोधर**-महीभुजः।
चरितं पावनं वक्ष्ये यथाशक्ति यथागमं ॥२॥
सर्वशास्त्रविदां मान्यैः सर्वशास्त्रविशारदैः।
प्रभंजनादिभिः पूर्वं **हरिषेण**-समन्वितैः ॥३॥
यदुक्तं तत्कथं शक्यं मया बालेन भाषितुं।
तथापि तत्क्रमांभोज-प्रणामार्जित-पुण्यतः ॥४॥
प्रोच्यमानं समासेन संसारासातशातनं।
वदतां शृण्वतां यच्च तत्संतः शृणुतादरात् ॥५॥

अन्तभाग :—

मारिदत्तादयश्चान्ये आर्यासंघं तथैव च।
सौधर्मादिकग्रैवेयपर्यंतं नाकमाश्रिताः ॥१८७॥
[1]"कृति**र्वासवसेन**स्य **वागडान्वय**जन्मनः।

---

१ यह प्रशस्ति-पद्य जैनसिद्धान्तभवन आराकी सं० १७३२ वाली एक प्रतिमें नहीं है किन्तु दूसरी सं० १५८१ की लिखी हुई उस प्रतिमें पाया जाता है जो रामसेनान्वयी भ० श्रीरत्नकीर्तिके प्रपट्टधर और भ० लखमसेन के पट्टधर भ० धर्मसेनके समयमें लिखी गई है।

इमां याशोधराभिख्यां संशोध्याधीयतां बुधैः ॥१००॥"

इति यशोधरचरिते मुनिवासवसेनकृते काव्ये अभयरुचिभट्टारक-अभयमत्योः स्वर्गगमनो चंडमारी-धर्मलाभो यशोमत्यादयोन्ये यथायथं नाकनिवासिनो नाम अष्टमः सर्गः समाप्तः ।

नेमिनिर्वाणकाव्य (कविवाग्भट)

आदिभाग :—

श्रीनाभिसूनोः पदपद्मयुग्मनखाः सुखानि प्रथयंतु ते वः ।
समन्नमन्नाकि-शिरःकिरीट-संघट्ट-विस्रस्तमणीयितं यैः ॥१॥

अन्तभाग :—

[1]भिल्लो विन्ध्यनगे वणिग्वरगुणश्चेभ्यादिकेतुः सुरः ।
चिंतायाति खगे महेन्द्रसुमना भूपोऽपराद्रिजितः ।
सोऽव्यादच्युतनायको नरपतिः स्वादिप्रतिष्ठोऽप्यह-
मिन्द्रो यश्च जयंतके सुरवरो नेमीश्वरः पातु वः ॥८६॥
अहिछत्रपुरोत्पन्न-प्राग्वाट-कुलशालिनः ।
छाहडस्य सुतश्चक्रे प्रबन्धं वाग्भटः कविः ॥८७॥

इति श्रीनेमिनिर्वाणे महाकाव्ये महाकविश्रीवाग्भटविरचिते नेमिनिर्वाणाभिधानो नाम पंचदशमः सर्गः समाप्तः ।

६. भूपाल-चतुर्विंशति-टीका (पं० आशाधर)

आदिभाग :—

प्रणम्य जिनमज्ञानां सज्ञानाय प्रचक्ष्महे ।
आशाधरो जिनस्तोत्रं श्रीभूपालकवेः कृतिः ॥१॥

---

१ ये अन्तके दोनों पद्य निर्णयसागर बम्बई से प्रकाशित हुए ग्रन्थमें नहीं है किन्तु आरा सि० भवन तथा देहलीकी प्रतियोंमें पाये जाते हैं ।

अन्तभाग :—

उपशमइव मूर्तिः पूतकीर्तिः स तस्मा-
दजनि विज(न)यचंद्रः सच्चकोरैकचंद्रः।
जगदमृतसगर्भाः शास्त्रसंदर्भगर्भाः
शुचिचरितसहिष्णोर्यस्य धिन्वंति वाचः ॥२६॥

विनयचन्द्रस्यार्थमित्याशाधरविरचिता भूपालचतुर्विंशतिजिनेन्द्रस्तुतेष्टीका परिसमाप्ता। [जयपुर प्रति

७. जम्बूस्वामिचरित्र (ब्र० जिनदास)

आदिभाग :—

श्रीवर्धमानतीर्थेशं वंदे मुक्तिवधूवरम्।
कारुण्यजलधिं देवं देवाधिप-नमस्कृतम् ॥१॥

अन्तभाग :—

श्रीकुंदकुंदान्वयमौलिरत्नं श्रीपद्मनंदी विदितः पृथिव्याम्।
सरस्वतीगच्छ विभूषणं च बभूव भव्यालिसरोजहंसः ॥२३॥
ततोभवत्तस्य जगत्प्रसिद्धे पट्टे मनोज्ञे सकलादिकीर्तिः।
महाकविः शुद्धचरित्रधारी निर्ग्रंथराजा जगति प्रतापी ॥२४॥

जयति सकलकीर्तेः पट्टपंकेजभानु-
जगति भुवनकीर्तिर्विश्वविख्यातकीर्तिः।
बहुयतिजनयुक्तः सर्वसावद्यमुक्तः
कुसुमशरविजेता भव्यसन्मार्गनेता ॥२५॥
विबुधजननिषेव्यः सत्कृतानेककाव्यः
परमगुणनिवासः सद्व्रतालीविलासः।
विजितकरणमारः प्राप्तसंसारपारः
स भवतु गतदोषः शर्मणे वः सतोषः ॥२६॥

षष्ठाष्टमादेस्तपसो विधाता, क्षमाभिधः श्रीनिलयं धरित्र्याम् ।
जीयाज्जितानेकपरीषहारिः, संबोधयन् भव्यगणं चिरं सः ॥२७॥
भ्रातास्ति तस्य प्रथितः पृथिव्यां, सद्ब्रह्मचारी **जिनदास**नामा ।
तेनेति तेने चरितं पवित्रं, **जंब्वादिनाम्नो** मुनिसत्तमस्य ॥२८॥
देशे विदेशे सततं विहारं, वितन्वता येन कृताः सुलोकाः ।
विशुद्धसर्वज्ञ मत-प्रवीणाः, परोपकारव्रततत्परेण ॥२९॥
स ब्रह्मचारी किल **धर्मदास**स्तस्यास्तिशिष्यः कविबद्धसख्यः ।
सौजन्यवल्लीजलदः कृतोयं, तद्योगतो व्याकरणप्रवीणः ॥३०॥
कवि**र्महादेव** इति प्रसिद्धस्तन्मित्रमास्ते द्विजवंशरत्नम् ।
महीतले नूनमसौकृत(ति)श्च साहाय्यतस्तस्य सुधर्महेतोः ॥३१॥
ग्रंथः कृतोऽयं जिननाथभक्त्या गुणानुरागाच्च महामुनीनाम् ।
पूजाभिधानाद्रहितेन नित्यं(नूनं)महाप्रशस्तः परमार्थबुद्ध्या ॥३२॥

× × × ×

एकविंशतिप्रमाणानि शतानि च चरित्रके ।
त्रिंशद्युक्तानि श्लोकानां शुभानां संति निश्चितम् ॥३७॥

इति श्रीजम्बूस्वामिचरित्रे भ० सकलकीर्तिशिष्य-ब्रह्मजिनदास-विरचिते विद्युच्चर-महामुनि-सर्वार्थसिद्धिगमनो नामैकादशमः सर्गः ॥११॥

८. सुदर्शनचरित्र (विद्यानंदी मुमुक्षु)

आदिभाग:—

ज्ञानरत्नाब्धितारेशं सर्वविद्याधिपं प्रभुं ।
आदिदेवं नमस्यामि भव्यराजीवभास्करं ॥१॥
चंद्रप्रभोः द्युतिः पायात्सतामंतःप्रकाशिनी ।
नित्यं करोति चंद्रस्य न कृष्णे साततोधिका ॥२॥
कर्मारातिजये शूरं वंदे शांतिं शिवश्रिये ।
संसारवनदावाग्नौ पतज्जीवेषु तायिनं ॥३॥

स्मरादीनां विजेतारं तं वीरं प्रणमाम्यहं ।
ज्ञानलक्ष्म्या हि भर्त्तारं निःप्रत्यूहं च शंकरं ॥४॥
शत्रूणां ये विजेतारश्चाभ्यंतरनिवर्त्तिनां ।
प्रणमामि जिनान् शेषान् सर्वपापापनुत्तये ॥५॥
सुदर्शनमुनिं वंदे धीरं सद्ब्रह्मचारिणं ।
येन कर्मारिमाहत्य प्राप्तं सिद्धत्वमद्भुतं ॥६॥
तनुता गुरवः सर्वे पूज्या मे शर्मसंपदम् ।
सर्वविघ्नहरा वंद्यास्तुल्याः सुरनराधिपैः ॥७॥
जिनराजमुखोत्पन्नां विमलां ज्ञानसंपदम् ।
दायिनीं शारदां स्तोष्ये मुहुरज्ञानहानये ॥८॥
मोहांधकारतरणिं तपस्तेजोऽनुसारिणं ।
गणेशं गौतमं वंदे संयतं जगदुत्तमं ॥९॥
कवित्व-नलिनीग्राम-निबोधन-सुधाघृणिं ।
वंद्यैर्वंद्यमहं वंदे कुंदकुंदाभिधं मुनिं ॥१०॥
यस्य यशोरवेर्नष्टा कृष्णास्या बौद्धकौशिकाः ।
स्तोष्येऽकलंकसूरिं तं मोह-मारंग-कन्धरम् ॥११॥
क्रोधसारंगकीलालं जिनसेनमहाकविं ।
कुवादिहंससारंगं वंदेऽहं तद्गुणाप्तये ॥१२॥
आवश्यकलता कन्द-प्रसारण-घनागमं ।
रत्नकीर्तिमहं भक्त्या स्तौमि गच्छाधिपं विभुं ॥१३॥
परवादि-महाक्रव्याद्दारणे लक्ष्मणाग्रजं ।
वागर्थमिह वंदेऽहं प्रभेन्दुं सूरिसत्तमं ॥१४॥
क्षमा-सर्वस्व-धरणिं बोधबीजस्य भूमिकां ।
मुनीन्द्रं गतसन्देहं पद्मनन्दिं स्तुवेऽनिशम् ॥१५॥
जीवाजीवादितत्त्वानां देशकं च गुणार्णवं ।
देवेन्द्रकीर्तिं भक्त्याऽहं मुनिं नौमि मुनीश्वरम् ॥१६॥

विद्यानन्दि-मुनीन्द्रेण तस्य शिष्येण धीमता ।
स्वस्यान्यस्योपकाराय दिने जातु मनोहरं ॥१७॥
चिन्तितं मानसे श्रेयो यतिना तत्कथं भवेत् ।
शुभोपदेशतोऽस्माकं पुनस्तस्य च योगतः ॥१८॥ (युग्मं)
येन श्रुतेन भव्यानामघं याति भवार्जितं ।
सुदर्शनमुनेर्वृत्तं वक्ष्येऽहं तत्समासतः ॥१९॥

अन्तभाग :—

योगत्रयेषु निष्णातः विशालकीर्तिशुद्धधीः ।
श्रीकुंदकुंदसंताने बभूव मुनिसत्तमः ॥९८॥
तत्पट्टेऽजनि विख्यातः पंचाचारपवित्रधीः ।
शुभकीर्तिमुनिश्रेष्ठः शुभकीर्तिः शुभप्रदः ॥९९॥
धर्मचन्द्रस्ततो रत्नकीर्तिः शुद्धवचोनिधिः ।
प्रभेन्दुः पद्मनन्दिश्च ख्यातः कामाहिमर्दनः ॥१००॥
भारतीगच्छपंकेज-विकाशन-दिवाकरः ।
देवेन्द्रनामकीर्त्यंते कीर्त्यते लोकविश्रुतः ॥१०१॥
विद्यानन्दिमुनिख्यातस्तस्य शिष्यो गुणाग्रणीः ।
सुदर्शनस्य तेनेदं चरितं शर्मणे कृतं ॥१०२॥
तनुता साधवः सर्वे चतुःसंघसमुद्भवाः ।
मया कृति(त)मिदं शोध्यं लोके तैर्विशदाशयैः ॥१०३॥
ये लेखयंति लिखंत पठंति पाठयंति च ।
सुदर्शनमुनेरेष चरित्रं ते सुखाश्नुते ॥१०४॥
यदक्षरस्वरैर्मात्राहीनं प्रमादतो इह ।
तं शोध्यं शुद्धचरितैः मुनिभिः मे कृतं तथा ॥१०५॥
गान्धारपुर्यां जिननाथचैत्ये छत्रध्वजाभूषितरम्यदेशे ।
कृतं चरित्रं स्वपरोपकारकृते पवित्रं हि सुदर्शनस्य ॥१०६॥

नित्यं नमामि तमहं जिनपार्श्वनाथं पद्मावती-धरणायन्न-नुतं त्रिकालं।
येनाखिलं निरसितं किलकर्मजालं नालं क्षमो रचयितुं स्तवनं तदीयं ॥१०७॥

जिनान्तिमं नागनरेंद्रवंद्यं, श्रीवर्द्धमानं गतरागबंधं।
अनंतातिगं सर्वगुणांबुराशिं, वंदे भवाब्ध्युत्तरणैकहेतोः ॥१०८॥

पंचैते परमेष्टिनः सुखकराः कारुण्यपूर्णाशयाः,
सार्द्धं श्रीजिनधर्म आगमयुतः सद्भव्यराशिस्तुतः।
चैत्यं श्रीजिननायकस्य सततं चैत्यालयं मेरु(?) वै,
शश्वन्मे शरणं भवाब्धितरणं भूयाद्भवापन्नुदे ॥१०९॥

इति श्रीसुदर्शनचरित्रे पंचनमस्कारमाहात्म्यप्रदर्शके मुमुक्षुश्रीविद्यानन्दि-विरचिते सुदर्शनमहामुनिमुक्तिगमनो नाम द्वादशमः परिच्छेदः समाप्तः।
संवत् १७७६ वर्षे शुभं भव। [दिल्ली, धर्मपुरा, नयामन्दिर।

६. सुदर्शनचरित्र (मुमुक्षु विद्यानन्दी)

आदिभाग :—

नत्वा पंचगुरून् भक्त्या पंचमं गतिनायकान्।
सुदर्शनमुनेश्चारुचरित्रं रचयाम्यहं ॥ १ ॥
येषां स्मरणमात्रेण सर्वे विघ्ना घना यथा।
वायुना प्रलयं याति तान्स्तुवे परमेष्ठिनः ॥२॥

(इसके बाद वृषभादि चतुर्विंशतितीर्थंकरों तथा सिद्धोंका स्मरण है)

जिनेन्द्र-वदनांभोज-समुत्पन्नां सरस्वतीं।
संस्तुवे त्रिजगन्मान्यां सन्मतेव सुखप्रदां ॥१८॥
यस्याः प्रसादतो नित्यं सतां बुद्धिः प्रसर्पति।
प्रभाते पद्मनीवोच्चैस्तां स्तुवे जिनभारतीं ॥१९॥
नमामि गुणरत्नानामाकरान्-श्रुतसागरान्।
गौतमादिगणाधीशान् संसाराम्भोधितारकान् ॥२०॥

कवित्वनलिनी-ग्राम-प्रबोधन-दिवामणिं ।
कुंदकुंदाभिधं नौमि मुनीन्द्रं महिमास्पदं ॥२१॥
जिनोक्त-समतत्त्वार्थसूत्रकर्ता कवीश्वरः ।
उमास्वातिमुनिर्नित्यं कुर्यान्मे ज्ञानसंपदां ॥२२॥
स्वामी **समन्तभद्रा**ख्यो मिथ्यातिमिरभास्करः ।
भव्यपद्मौघसंस्कर्ता जीयान्मे(न्मो) भावितीर्थकृत् ॥२३॥
विप्रवंशाऽग्रणीः सूरिः पवित्रः **पात्रकेशरी** ।
संजीयाज्जिनपादाब्जसेवनैकमधुव्रतः ॥२४॥
यस्य वाक्किरणैर्नष्टा बौद्धौघाः कौशिका यथा ।
भास्करस्योदये स स्याद**कलङ्कः** श्रिये कविः ॥२५॥
श्रीजिनेन्द्र-मतांभोधि-वर्द्धनैकविधूत्तमं ।
जिनसेनं जगद्वंद्यं संस्तुवे मुनिनायकं ॥२६॥
मूलसंघाग्रणीर्नित्यं **रत्नकीर्ति**गुरुर्महान ।
रत्नत्रय-पवित्रात्मा पायान्मां चरणाश्रितं ॥२७॥
कुवादिमत्तमातंग-विमदीकरणे हरिः ।
गुणभद्रो गुरुर्जीयात्कवित्वकरणे प्रभुः ॥२८॥
भट्टारको जगत्पूज्यः **प्रभाचन्द्रो** गुणाकरः ।
वंद्यते स मया नित्यं भव्यराजीवभास्करः ॥२९॥
जीवाजीवादितत्त्वानां समुद्योतदिवाकर ।
वंदे **देवेन्द्रकीर्तिं** च सूरिवर्यं दयानिधिं ॥३०॥
मद्गुरुर्योविशेषेण दीक्षालक्ष्मीप्रसादकृत् ।
तमहं भक्तितो वंदे **विद्यानन्दी** सुसेवकः ॥३१॥
सूरिराशाधरो जीयात् सम्यग्दृष्टिशिरोमणिः ।
श्रीजिनेन्द्रोक्त-सद्धर्म-पद्माकर-दिवामणिः ॥३२॥
इत्याप्त-भारती-साधु-संस्तुतिं शर्मदायिनीं ।
मंगलाय विधायोच्चैः सच्चरित्रं सतां ब्रुवे ॥३३॥

तुच्छमेधोऽपि संक्षेपात् सुदर्शनमहामुनेः ।
वृत्तं विधाय पूतोस्मि सुधा-स्पर्शोपि शर्मणे ॥३४॥

इति श्रीसुदर्शनचरिते पंचनमस्कारमाहात्म्यप्रदर्शके मुमुक्षुश्रीविद्यनंदि-विरचिते श्रीमहावीरतीर्थंकरपरमदेवसमागमाख्यवर्णनो नाम प्रथमोधिकारः ।

अन्तभाग :—

गांधारपुर्यां जिननाथगेहे छत्रध्वजाद्यैः परिशोभितेऽत्र ।
कृतं चरित्रं स्वपरोपकार-कृते पवित्रं हि सुदर्शनस्य ॥४२॥
श्रीमूलसंघे वरभारतीये गच्छे बलात्कारगणेऽतिरम्ये ।
श्रीकुंदकुंदाख्यमुनीन्द्रवंशे जातः प्रभाचन्द्र-महामुनीन्द्रः ॥४७
पट्टे तदीये मुनिपद्मनंदी भट्टारको भव्यसरोजभानुः ।
जातो जगत्त्रयहितो गुणरत्नसिंधुः कुर्यात्सता सारसुखं यतीशः ॥४८॥
तत्पट्टपद्माकरभास्करोऽत्र देवेन्द्रकीर्तिर्मुनिचक्रवर्ती ।
तत्पादपंकेजसुभक्तियुक्तो विद्यादिनंदी चरितं चकार ॥४६॥
तत्पट्टे जिनमल्लिभूषणगुरुश्चारित्रचूडामणिः
संसाराम्बुधितारणैकचतुरश्चिन्तामणिः प्राणिनां ।
सूरिश्रीश्रुतसागरो गुणनिधिः श्रीसिंहनन्दी गुरुः ।
सर्वे ते यतिसत्तमाः शुभतरा कुर्वन्तु वो मंगलं ॥५०॥
गुरुणामुपदेशेन सच्चरित्रमिदं शुभं ।
नेमिदत्तो व्रती भक्त्या भावयामास शर्मदं ॥५१॥

इति श्रीसुदर्शनचरिते पंचनमस्कारमाहात्म्यप्रदर्शके ब्रह्मश्रीनेमिदत्त-विरचिते·······एकदशमोधिकारः । [जयपुर प्रति

नोट—१०वीं संधितक ग्रन्थकारका नाम मुमुक्षुविद्यानन्दी ही दिया है और इस ग्यारहवें अधिकारके उक्त श्लोक नं० ४६ में भी इसे विद्यानंदि-कृत सूचित किया है; परन्तु इस अन्तिम संधिमें ब्रह्मनेमिदत्तका नाम दिया है, जो चिन्तनीय है। क्या ५१वें पद्यानुसार ब्र०नेमिदत्तके द्वारा

इस ग्रन्थके भावित ('भावयामास') होनेसे ही यह नाम बादको दिया गया है ? विद्यानंदिके नामका दूसरा भी यशोधरचरित है जिसकी प्रशस्ति इससे पहले नं० ८ पर दी गई है। दोनोंमें विद्यानन्दीकी गुरुपरम्परा एक है और पद्योंका कितना ही साम्य है। फिर भी दोनोंको रचनापरसे सर्वथा एक नहीं कहा जा सकता।

१०. श्रीपालचरित्र (श्रुतसागर)

आदिभाग :—

अर्हतः संस्तुवे **सिद्धान्** वंदे निर्ग्रंथनायकान्।
श्रयामि **पाठकान्** सेवे **साधू**नाराधये मुदा ॥१॥
सिद्धान् जगच्छिरोरत्नप्रायान् वंदामहे मदा।
त्रिशुद्धयै यां यदाऽध्येति मानवः श्लाघ्यते तदा ॥२॥
संसारसरितानाथ-समुत्तरण-कारणम्।
जिनं नत्वा ब्रुवे वृत्तं श्रीपालनृपतेः शुभम ॥३॥
(मध्यका कथाभाग गद्यात्मक है)

अन्तभाग :—

सिद्धचक्रव्रतात्सोऽयमीदृशाऽभ्युदयो बभौ।
निःश्रेयसमितोऽस्मभ्यं ददातु स्वगतिं प्रभुः ॥१॥
श्री**विद्यानंदि**पादाब्जे मत्तभृंगेणधीमता।
श्रुतादिसागरेणेयं संपत्पालकथा कृता ॥२॥
इति श्रीपालनृपचरित्रं समाप्तं।

११. श्रीपालचरित्र (ब्र० नेमिदत्त)

आदिभाग :—

नत्वा श्रीमज्जिनाधीशं सुराधीशार्चितक्रमं।
श्रीपालचरितं वक्ष्ये सिद्धचक्रार्चनोत्तमं ॥१॥

(वृषभादि २४ तीर्थंकरों, सिद्धों आदिके स्मरणके अनन्तर-)

एतेषां शर्महेतूनां चरणस्तुतिमंगलं ।
कृत्वाऽहं तुच्छबुद्धयापि श्रीपालचरितं ब्रुवे ॥२२॥
यच्चरित्रं सदासर्व्वरोगसंतापनाशनं ।
सिद्धचक्रव्रतोपेतं सिद्धौषधिमिवोत्तमं ॥२३॥
यत्पुरा रचितं पूर्वसूरिभिः श्रुतसागरैः ।
तदहं चापि वक्ष्यामि किमाश्चर्यमतः परं ॥२४॥

अन्तभाग :—

गच्छे श्रीमति मूलसंघतिलके सारस्वतीये शुभे ।
श्रीभट्टारकपद्मनन्दिमुनिपो देवेन्द्रकीर्तिस्ततः ॥३२॥
विद्यानन्दिगुरुस्ततो गुणनिधिः पट्टे तदीये सुधीः ।
श्रीभट्टारकमल्लिभूषणगुरुः सद्बोधसिंधुर्महान् ॥३३॥
तच्छिष्यो गुणरत्नरंजितमतिः श्रीसिंहनन्दी गुरुः
सद्रत्नत्रयमंडितोऽति नितरां भव्यौघनिस्तारकः ।
तेषां पादपयोजयुग्ममधुपः श्रीनेमिदत्तो यती
चक्रे चारुचरित्रमेतदुचितं श्रीपालजं शं क्रियात् ॥३४॥
अग्रोतोत्तमवंशमंडनमणिः सद्ब्रह्मचारी शुभः
श्रीभट्टारक-मल्लिभूषणगुरोः पादाब्जसेवारतः ।
जीयादत्र महेन्द्रदत्तसुयती संज्ञानवान्निर्मलः
सूरिः श्रीश्रुतसागरादियतिना सेवापरः सन्मतिः ॥३५॥
ख्याते मालवदेशस्थ पूर्णाशानगरे वरे ।
श्रीमदादिजिनागारे सिद्धं शास्त्रमिदं शुभं ॥३६॥
संवत्सार्द्धसहस्रे च पंचाशीतिसमुत्तरे(१५८५) ।
आषाढे शुक्लपंचम्यां संपूर्णे रविवासरे ॥३७॥

इति श्रीसिद्धचक्रपूजातिशय-प्राप्त-श्रीपालमहाराज-चरित्रे भट्टारक-

श्रीमल्लिभूषणशिष्याचार्यश्रीसिंहनंदि-ब्रह्मशान्तिदासानुमोदिते ब्रह्म-नेमिदत्त-विरचिते श्रीपालमुनीन्द्रनिर्वाणगमनवर्णनो नाम नवमो सर्गः ॥९॥

१२. धर्मोपदेशपीयूषवर्ष (ब्र० नेमिदत्त)

आदिभाग :—

श्रीसर्वज्ञं प्रणम्योच्चैः केवलज्ञानलोचनं ।
सद्धर्म्मं देशयाम्येष भव्यानां शर्महेतवे ॥१॥

अन्तभाग :—

इत्थं श्रीजिनभाषितं शुभतरं धर्मं जगद्योतकं
सद्रत्नत्रयलक्षणं द्वितयगं देवेन्द्रचन्द्रार्चितं ।
ये भव्या निजशक्तिभक्तिसहिताः संपालयंत्यादरात्
ते नाकीं(कें)द्र-नरेंद्र-चक्रि-पदवीं भुक्त्वा शिवं यांति च ॥१६॥
गच्छे श्रीमति मूल[संघ]तिलके सारस्वतीये शुभे
विद्यानंदिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः ।
श्रीभट्टारकमल्लिभूषणगुरुः सिद्धांतसिंधुर्महां-
स्तच्छिष्यो मुनिसिंहनंदिसुगुरुर्जीयात मतो भूतले ॥१७॥
तेषां पादाब्जयुग्मे निहितनिजमतिर्नेमिदत्तः स्वशक्त्या
भक्त्या शास्त्रं चकार प्रचुरसुखकरं श्रावकाचारमुच्चैः ।
नित्यं भव्यैर्विशुद्धैः सकलगुणनिधैः प्रातिहितं च मत्वा
युक्त्या संसेविताऽसौ दिशतु शुभतमं मंगलं सज्जनानां ॥१८॥
लेखकानां वाचकानां पाठकानां तथैव च ।
पालकानां सुखं कुर्यान्नित्यं शास्त्रमिदं शुभं ॥१९॥

इति धर्मोपदेशपीयूषवर्षनामश्रावकाचारे भट्टारकश्रीमल्लिभूषणशिष्य-ब्रह्मनेमिदत्त-विरचिते सल्लेखनाक्रम-व्यावर्णनो नाम पंचमोऽधिकारः ।

१३. उपदेशरत्नमाला (भ० सकलभूषण)

आदिभाग :—

वंदे श्रीवृषभं देवं दिव्यलक्षणलक्षितम् ।
प्रीणित-प्राणिसद्वर्गं युगादिपुरुषोत्तमम् ॥१॥

× × × ×

श्रीकुंदकुंदनामानं यतीशं जितमत्सरम् ।
उमास्वाति समंतादिभद्रांतं पूज्यपादकम् ॥१५॥
अकलंकं कलाधारं नेमिचन्द्रं मुनीश्वरम् ।
विद्यानंदं प्रभाचन्द्रं पद्मनंदिगुरुं परम् ॥१६॥
श्रीमत्सकलकीर्त्याख्यं भट्टारकशिरोमणिम् ।
भुवनादिसुकीर्त्यन्तं गच्छाधीशं गुणोद्धरम् ॥१७॥
ज्ञानभूषणनामानं ज्ञानज्ञातभवस्थितिम् ।
वरं विजयकीर्तिं च कीर्तिव्याप्तसुभूतलं ॥१८॥
शुंभच्छोभाभरभ्राजमानं श्रीशुभचन्द्रकम् ।
सुबुद्धि(सुमति)कीर्तिसंयुक्तं नौमि प्रारब्धसिद्धये ॥१९॥

अन्तभाग :—

श्रीमूलसंघतिलके वरनंदिसंघे गच्छे सरस्वतिसुनाम्नि जगत्प्रसिद्धे ।
श्रीकुंदकुंदगुरुपट्टपरंपरायां श्रीपद्मनंदिमुनिपः समभूजिताक्षः ॥२२५॥
तत्पट्टधारी जनचित्तहारी पुराणमुख्योत्तमशास्त्रकारी ।
भट्टारकः श्रीसकलादिकीर्तिः प्रसिद्धनामाऽजनि पुण्यमूर्तिः ॥२२६॥
भुवनकीर्तिगुरुस्तत ऊर्जितो भुवनभासनशासनमंडनः ।
अजनि तीव्रतपश्चरणक्षमो विविधधर्मसमृद्धिसुदेशकः ॥२२७॥
श्री(सं)ज्ञानभूषेण परि(वि)भूषितांगः प्रसिद्धपांडित्यकलानिधानः ।
श्रीज्ञानभूषाख्यगुरुस्तदीयपट्टोदयाद्राविव भानुरासीत् ॥२२८॥
भट्टारकः श्रीविजयादिकीर्तिस्तदीयपट्टे परिलब्धकीर्तिः ।

महामना मोक्षसुखाभिलाषी बभूव जैनावनिपार्श्वपादः ॥२२९॥
भट्टारकः श्रीशुभचन्द्रसूरिस्तत्पट्टपंकेरुहतिग्मरश्मिः ।
त्रैविद्यवंद्यः सकलप्रसिद्धो वादीभसिंहो जयताद्धरित्र्यां ॥२३०॥
पट्टे तस्य प्रीणितप्राणिवर्गः, शांतो दांतः शीलशाली सुधीमान् ।
जीयात्सूरिः श्रीसुमत्यादिकीर्तिर्गच्छाधीशः कम्रकान्तिः कलावान् ॥२३१॥

तस्याभूच्च गुरुभ्राता नाम्ना सकलभूषणः ।
सूरिर्जिनमते लीनमनाः संतोषपोषकः ॥२३२॥
तेनोपदेशसद्रत्नमालासंज्ञो मनोहरः ।
कृतः कृतिजनानंद-निमित्तं ग्रंथ एषकः ॥२३३॥
श्रीनेमिचन्द्राचार्यादियतीनामाग्रहात्कृतः ।
सद्वर्धमानाटोलादि-प्रार्थनातो मयैषकः ॥२३४॥
सप्ताविंशत्यधिके षोडशशतवत्सरेषु (१६२७) विक्रमतः ।
श्रावणमासे शुक्ले पक्षे षष्ठ्यां कृतो ग्रन्थः ॥२३५॥
न मया ख्यातिनिमित्तं न चाभिमानेन विरचितो ग्रंथः ।
धर्मरतानां गृहिणां हिताय च स्वस्य पुण्याय ॥२३६॥

×　　×　　×　　×

सहस्रत्रितयं चैव त्रिशतं च(तथैवा)शीति-संयुतम् ।
अनुष्टुप्छंदसां चास्य प्रमाणं निश्चितं बुधैः ॥२४३॥

इति श्रीभट्टारक श्रीशुभचन्द्रशिष्याचार्य-श्रीसकलभूषण-विरचितायामुपदेशरत्नमालायां पुण्यपट्कर्मप्रकाशिकायां तपोदानमाहात्म्य-वर्णनो नामाऽष्टादशः परिच्छेदः समाप्तः ।

१४. श्रावकाचारसारोद्धार (मुनि पद्मनन्दी)

आदिभाग :—

स्व-संवेदन-सुव्यक्त-महिमानमनश्वरं ।
परमात्मानमाद्यंतविमुक्तं चिन्मयं नुमः ॥१॥

श्रीनाभेयो जिनो भूयाद्भूयसे श्रेयसे स वः।
जगज्ज्ञानजले यस्य दधाति कमलाऽऽकृतिं ॥२॥
वंदारु-त्रिदशाधीशशिरोमणि-विभार्चितं।
यदंह्रिद्वितयं सोऽस्तु संपदे शशिलांछनः ॥३॥

अन्तभाग :—

इति श्रावकाचारसारोद्धारे श्रीपद्मनन्दिमुनिविरचिते द्वादशव्रतवर्णनो नाम तृतीयः परिच्छेदो समाप्तः ॥३॥

यस्य तीर्थकरस्येव महिमा भुवनातिगा।
रत्नकीर्तिर्यतिः स्तुत्यः स न केषामशेषवित् ॥१॥
अहंकारस्फारी भवदमितवेदांतविबुधा—
ल्लसत्सिद्धांतश्रेणी-क्षपण-निपुणोक्तिद्युतिभरः।
अधीती जैनेन्द्रेऽजनि रजनिनाथ-प्रतिनिधिः
प्रभाचन्द्रः सान्द्रोदयशमितापव्यतिकरः ॥२॥
महाव्रति-पुरंदरः प्रशमदग्धा(दग्धभवा)ङ्कुरः
स्फुरत्परपौरुषस्थितिरशेषशास्त्रार्थवित्।
यशोभर-मनोहरीकृत-समस्तविश्वंभरः
परोपकृति-तत्परो जयति पद्मनन्दीश्वरः ॥३॥
श्रीमत्प्रभेन्दुप्रभुपादसेवा-हेवाकिचेत्ताऽप्रसरत्प्रभावः।
सच्छ्रावकाचारमुदारमेनं श्रीपद्मनन्दी रचनां चकार ॥४॥
श्रीलंबकंचुककुले विततांतरिक्षे, कुर्वन् स्वबांधवसरोजविकाशलक्ष्मीं।
लुंपन् विपक्षकुमुदव्रजभूरिकांतिं, गोकर्णहेलिरुदियाय लसत्प्रतापः ॥५॥
भुवि सूपकारसारं पुण्यवता येन निर्म्ममे कर्म्म।
भीमइव सोमदेवो गोकर्णात्सोभवत्पुत्रः ॥६॥
सती मतल्लिका तस्य यशः कुसुमवल्लिका।
पत्नी श्रीसोमदेवस्य प्रेमा प्रेमपरायणा ॥७॥

विशुद्धयोः स्वभावेन ज्ञानलक्ष्मी जितेन्द्रियोः ।
नया इवाऽभवन् सप्तगंभीरास्तनयास्तयोः ॥८॥
वासाधर-हरिराजौ प्रह्लादः शुद्धधीश्च महराजः ।
भवराजो रत्नाख्यः सतनाख्यश्चेत्यमी सप्त ॥९॥
वासाधरस्याद्भुतभाग्यराशेर्मिप्रात्तयोर्वेश्मनि कल्पवृक्षः ।
अगण्यपुण्योदयतोऽवतीर्णो वितीर्णचेतोऽभिमतार्थसार्थः ॥१०॥
वासाधरेण सुधिया गांभीर्याद्यदि ऋणीकृतो नाब्धिः ।
कथमन्यथा स वडवाज्वलनज्वलनसूत्रस्थितोद्वलति ॥११॥
सांद्रानन्दस्वरूपाद्भुतमहिमपरब्रह्मविद्याविनोदा-
च्चात्तं जैनेन्द्रपादार्च्चनविमलविधौ पात्रदानाच्च पाणि ।
वाणी सन्मंत्रजापी प्रवचनवचनाकर्णनात्कर्णयुग्मं
लोकालोकावलोकान्न विरमति यशः साधुवासाधरस्य ॥१२॥
शीतांशूराजहंसत्यमितकुवलयत्युल्लसत्तारकालि-
स्तिग्मांशुः स्मेररक्तोत्पलस्थलति जगदिदं त्वांतरीयत्यशेषं ।
जंबालत्यंतरिक्षं कनकगिरिरयं चक्रवाकत्युदग्रः
साधोवासाधरौदार्यगुणनिलय यशो वारिपूरो त्वदीयः ॥१३॥
द्वितीयाप्यद्वितीयो भूद्धर्योदार्यादिभिर्गुणैः ।
पुत्रः सोमदेवस्य हरिराजाऽभिधः सुधीः ॥१४॥
गुणैः सदास्मप्रतिपक्षभूतैः संगं करोत्येष विवेकचक्षुः ।
इतीव सेर्ष्यैर्हरिराजसाधुर्दोषैरवालोकितशीलसिंधुः ॥१५॥
संप्राप्य रत्नत्रितयैकपात्रं रत्नं सुतं मंडनमुर्व्वरायाः ।
श्रीसोमदेवः स्वकुटुम्बभार-निर्व्वाह-चिंता-रहितो बभूव ॥१६॥
दृष्टं शिष्टजनैः सपत्नकमलैः कुत्रापि लीनं जवा-
दर्थिप्रोद्धतनीलकंठनिवहैश्छत्रं प्रमोदो हु मान् (?) ।
तृष्णाधूलिकणोत्करैर्विगलितं स्थाने मुनीन्द्रैः स्थितिं ।
वृष्टिं दानमर्थविन्वति(?) परां रत्नांकरोम्भोधरो ॥१७॥

संतोनाम्नां पत्न्यां जिनराजध्यानकृत्सहरिराजः।
पुत्रं मनःसुखाख्यं धर्म्मादुत्पादयामास ॥१८॥
सति प्रभुत्वे पि मदो न यस्य रतिः परस्त्रीषु न यौवनेऽपि।
परोपकारैकनिधिः स साधुर्धर्म्मात्सुखः कस्य न माननीयः ॥१६॥
जैनेंद्रांह्रिसरोजभक्तिरचला बुद्धिर्विवेकांचिता
लक्ष्मीर्दीनसमर्पिता सकरुणं चेतः सुधायुग्वचः।
रूपं शीलयुतं परोपकरणव्यापारनिष्ठं वपुः
शास्त्रं चापि मनःसुखे गतमदं काले कलौ दृश्यते ॥२०॥
संघभारधरो धीरः साधुर्वासाधरः सुधीः।
सिद्धये श्रावकाचारमचीकरदमुं मुदा ॥२१॥
यावत्सागरमेखला वसुमती यावत्सुवर्णाचलः
स्वर्णारी कुलसंकुगमितं(?)............।
चिन्तास्क(?)..........लोकप्रकाशोद्यतो
तावन्नंदतु पुत्र-पौत्रसहितो वासाधरः श्रावकः ॥२२॥
[आमेर-प्रति

१५. महापुराण-टीका (भ० ललितकीर्ति)

आदिभाग:—

नत्वा श्रीमज्जिनेशानं लोकालोकप्रकाशकम्।
टीकां महापुराणस्य कुर्वे स्वाभीष्टसिद्धये ॥१॥

अथ श्रीमज्जिनसेनाचार्यः श्रीमद्गुणभद्राचार्यवर्यसंसेवितपाद-पंकेरुहयुग्मो रत्नत्रयमंडितमूर्तिर्निःशेषविघ्नसमाप्त्यर्थं भगवन्नमस्क्रियारूपं मंगलमाचष्टे।.........

अन्तभाग:—

वर्षे सागरनागभोगिकुमिते (१८७४) मार्गे च मासेऽसिते
पक्षे पक्षति-सत्तिथौ रविदिने टीका कृतेयं वरा।

काष्ठासंघवरे च माथुरवरे गच्छे गणे पुष्करे
देवः श्रीजगदादिकीर्तिरभवत्ख्यातो जितात्मा महान् ॥१॥
तच्छिष्येण च मंदतान्वितधिया भट्टारकत्वं यता
शुंभद्रे ललितादिकीर्त्यभिधया ख्यातेन लोके ध्रुवम् ।
राजच्छ्रीजिनसेनभाषितमहाकाव्यस्य भक्त्या मया
संशोध्यैव सुपठ्यतां बुधजनैः क्षांतिं विधायादरात् ॥२॥

१६. पंचनमस्कार-दीपक (भ० सिंहनन्दि)

आदिभाग :—

नमाम्यर्हन्तं देवेशं लक्ष्मीरात्यंतिकी स्वयं ।
यस्य निर्द्धूत-कर्मेन्ध-धूमस्यापि विराजते ॥१॥

अन्तभाग :—

श्रीमूलसंघे वरपुष्कराख्ये गच्छे सुजातः शुभचन्द्रसूरिः ।
तस्याऽत्र पट्टेऽजनि सिंहनन्दिर्भट्टारकोऽभूद्विदुषां वरेण्यः ॥५३॥

तेनेदं रचितं ग्रंथं नाम्ना पंचनमस्कृति-
दीपकं विस्तरभिया संक्षिप्तं चाल्पमेधसा ॥५४॥

अब्दैस्तत्त्वरसर्तुचंद्रकलिते (१६६७) श्रीविक्रमादित्यजे
मासे कार्तिकनामनीह धवले पक्षे शरत्संभवे ।
वारे भास्वति सिद्धनामनि तथा योगेषु पूर्णातिथौ
नक्षत्रेऽश्विनिनाम्नि तत्त्वरसिकः पूर्णीकृतो ग्रंथकः ॥५५॥

श्लोकं सहस्रगणितं वक्तुः श्रोतुः सुखप्रदं ।
ग्रन्थस्य पंचनत्याख्यदीपकस्याऽस्य तिष्ठतां ॥५६॥

इति बहुतरमपि फलविषयं पंचनमस्कारग्रन्थे संक्षिप्य पूर्णीकृतं ।

१७. द्विसंधानकाव्य-टीका (पं० नेमिचन्द्र)

आदिभाग :—

श्रीमान् शिवानन्दनयीशवंद्यो भूयाद्विभूत्यै मुनिसुव्रतो वः ।
सद्धर्मसंभूतिनरेन्द्रपूज्यो भिन्नेन्द्रनीलोल्लसदंगकांतिः ॥१॥
जीयान्मृगेन्द्रो विनयेन्दुनामा संवित्सदाराजितकंठपीठः ।
प्रत्तीववादीभ-कपोलभित्ति प्रमात्वरैः स्वैर्नखरैर्विदार्य ॥२॥
तस्याथ शिष्योऽजनि देवनन्दी सद्ब्रह्मचर्यव्रत-देव-नन्दी ।
पादाम्बुजद्वंद्वमनिंद्यमर्च्यं तस्योत्तमांगेन नमस्करोमि ॥ ३ ॥
त्रैलोक्यकीर्तेश्चरणारविंदं पारं भवार्णोधितटीं[1] प्रणम्य ।
पिपासतां राघव-पांडवीयां टीकां करिष्ये पदकौमदीं तां ॥४॥

अन्तभाग :—

इति निरवद्यविद्यामण्डनमण्डित-पण्डितमण्डली-मण्डितस्य षट्तर्क-चक्रवर्तिनः श्रीमद्विनयचन्द्रपण्डितस्य गुरोरंतेवासिनो देवनन्दिनाम्नः शिष्येण सकलकलोद्भव-चारुचातुरी-चंद्रिकाचकोरेण नेमिचन्द्रेण विरचितायां द्विसंधानकवेर्धनंजयस्य राघवपांडवीयापरनाम्नः[2] काव्यस्य 'पद-कौमुदी'नाम दधानायां टीकायां श्रीरामकृष्णयुधिष्ठराभ्युदयवर्णनं[3] नामाष्टादशः सर्गः समाप्तः ॥१८॥

१८. ज्ञानसूर्योदय-नाटक (भ० वादिचन्द्र)

आदिभाग :—

अनाद्यनन्तरूपाय पंचवर्णात्ममूर्त्तये ।
अनंतमहिमाप्ताय सदौंकार नमोस्तु ते ॥१॥

---

१ 'पारे नयार्णोदधिसं' इति आरा सि० भ० प्रतौ पाठः ।
२ 'राघवपांडवीयाभिधानस्य' इति आरा सि० भ० प्रतौ पाठः ।
३ 'नायकाभ्युदय-रावण-जरासंध-वर्णनं' इति आ० सि० भ० प्रतौ पाठः ।

तस्मादभिन्नरूपस्य वृषभस्य जिनेशतुः ।
नत्वा तस्य पदांभोजं-भूषिताऽखिलभूतलं ॥२॥
भूपीठभ्रांतभूतानां भूयिष्ठानंददायिनीं ।
भजे भवापहां भाषां भवभ्रमणभंजिनीं ॥३॥
येषां ग्रन्थस्य संदर्भो प्रोस्फुरीति विदां हृदि ।
ववंदे तान् गुरून् भूयो भक्तिभारनमच्छिरः ॥४॥

नाद्यंते सूत्रधारः—आदिष्टोस्मि ।

ब्रह्मश्री**कमलसागर**—ब्रह्मश्री**कीर्तिसागरा**भ्यां सकलागमामवारिधि-चंद्रावताराणां **सरस्वतीगच्छ**शृंगारहाराणां श्रीमन्**मूलसंघो**दयाद्रिप्रकटन-प्रभाकराणां चंचच्छिखि-शिखंडशोभितकरकमलानां त्रिविद्यविद्याचक्रवर्तिनां दिगम्बरशिरोमणीनां श्रीमत्**प्रभाचन्द्र**सूरीश्वराणां शिष्यैरस्मद्गुरुभिश्च श्रीमद्वादिचन्द्रसूरिभिर्निर्माय **ज्ञानसूर्योदयं** नामनाटकं प्रदत्तमासीत् तत्सभ्यानां पुरतोऽभिनेतव्यं अस्ति चाधुना सर्वेषां कुतूहललालसं चेतः । इति प्रस्तावः ।

अन्तभाग :—

मूलसंघे समासाद्य **ज्ञानभूषं** बुधोत्तमाः ।
दुस्तरं हि भवांभोधिं सुतरिं मन्वते हृदि ॥१॥
तत्पट्टामलभूषणं समभवद्दैगम्बरीये मते
चंचद्बर्हकरः स भाति चतुरः श्रीमत्**प्रभाचन्द्रमाः** ।
तत्पट्टेऽजनि वादिवृन्दतिलकः श्री**वादिचन्द्रो** यति-
स्तेनायं व्यरचि प्रबोधतरणिर्भव्याब्जसंबोधनः ॥२॥
वसुवेदरसाब्जांके (१६४८) वर्षे माघे सिताष्टमी-दिवसे ।
श्रीमन्**मधूकनगरे** सिद्धोऽयं बोधसंरंभः ॥३॥ १८३॥

इति सूरिश्रीवादिचन्द्र विरचिते ज्ञानसूर्योदयनाटके चतुर्थोऽध्यायः॥४॥

संपूर्णोयं ग्रन्थः । स्वस्ति ।

१६. षोडशकारणव्रतोद्यापन (केशवसेन सूरि)

आदिभाग :—

श्रीमंतं धरणीश्वरार्च्चितपदं पापापहं हंसभं
हंसास्य हरिहंसदोदयमहं स्तुत्वार्षभं देवतां ।
भक्त्या षोडशकारणार्च्चनविधिं विद्वज्जनोल्लासकं ।
कुर्वे केशवसेनसूरिरतुलश्रीधर्म्मणो सन्मणिः ॥१॥

अन्तभाग :—

दिक्संघेऽभूद्रामसेनक्रमेण श्रीमान् विद्वद्रत्नभूषो भदंतः ।
चारित्रांभो जातभानुश्चकास्ति, तत्पट्टे वै श्रीजयाद्यंतकीर्तिः ॥१३॥
वेदनंदरसचंद्रवत्सरे (१६६४) मार्गमासि सितसप्तमीविधौ(तिथौ) ।
रामनामनगरे मया कृतार्च्चान्यपुण्यनिवहाय सूरिणा ॥१४॥
श्रीमत्केशवसेनसूरिगदितां पूजां पठंत्येव ये
शृण्वन्ति त्वथ पाठयन्ति सुनरा नार्यश्च सद्भावतः ।
ये चात्रैव लिखाप्य पुस्तकमथ प्रायः सुपात्राय वै
दास्यंत्यर्थमिनप्रतापमखिलैश्वर्यं लभंतेऽन्तके ॥१५॥
इति श्रीआचार्यकेशवसेन-विरचितं षोडशकारणव्रतोद्यापनं संपूर्णं ॥

२०. चतुर्दशीव्रतोद्यापन (अक्षयराम)

आदिभाग :—

श्रीवीरं शिरसानम्य वक्ष्ये संक्षेपतस्तरां ।
चतुर्दश्युपवासानामष्टषष्ठिशतप्रमां ॥१॥

अन्तभाग :—

शास्त्राब्धेः पारगामी परममुनिरभून्मंडलाचार्य्यमुख्यः
श्रीविद्यानन्दिनामा निखिलगुणनिधिः पुण्यमूर्तिः प्रसिद्धः ।

तच्छिष्यो संप्रधारी(?)विबुधजनमनोहर्षसंदानदक्षो
दक्षोऽबैरामनामा विधिरमुमकरोत्पूजनाया विधेश्च ॥१॥
श्रीजयसिंहभूपस्य मंत्रिमुख्योऽग्रणीः सतां।
श्रावकस्ताराचंद्राख्यस्तेनेदं व्रतसमुद्धृतं ॥२॥
तदवसरमुद्दिश्य पूर्व्वशास्त्रानुवृत्तितः।
व्रतोद्योतनमेतेन कारितं पुण्यहेतवे ॥३॥
अब्दे द्विशून्याष्टैकांके (१८००) चैत्रमासेसिते दले।
पंचम्यां च चतुर्दश्या व्रतस्योद्योतनं कृतं ॥४॥
इति प्रतिमासान्तचतुर्दशीव्रतोद्यापनविधि-पूजा-जयमाला संपूर्णं।

२१. त्रिभंगीसारटीका (सोमदेवसूरि)

आदिभाग :—

सर्वज्ञं करुणार्णवं त्रिभुवनाधीशार्च्यपादं विभुं
यज्जीवादिपदार्थसार्थकलने लब्धप्रशंसं सदा।
तं नत्वाऽखिलमंगलास्पदमहं श्रीनेमिचन्द्र जिनं
वक्ष्ये भव्यजनप्रबोधजननीं टीकां सुबोधाऽभिधां ॥१॥
जिनेन्द्रवक्त्राम्बुरुहाद्विनिर्गतां स्याद्वादरूपां गुणशालिनीं सदा।
निरस्य जाड्यं प्रददाति या मतिं तां भारतीं नौमि परंपवित्रां ॥२॥
कर्म्मद्रुमोन्मूलनदिक्करीन्द्रं सिद्धान्तपाथोनिधिदृष्टपारं।
षट्त्रिंशदाचार्यगुणैः प्रयुक्तं नमाम्यहं श्रीगुणभद्रसूरिं ॥३॥
या पूर्वा श्रुतटीका कर्णाट[सु]भाषया विहिता।
लाटीयभाषया सा विरच्यते सोमदेवेन ॥४॥
अतीन्द्रियसुखप्राप्त्यै निर्मुक्तै जन्मसंततेः।
भाविता जायते सम्यग्भावना बंधमोक्षयोः ॥५॥
प्रणिपत्य नेमिचन्द्रं वृषभाद्यान् वीरपश्चिमाञ्जिनान् सर्वान्।
वक्ष्ये सुभाषयाऽहं विशदां टीकां त्रिभंग्यायां ॥६॥

अन्तभाग :—

अमितगुणगण: साध्वीभदेवाब्धिसोम:
विजयनिवरत्नं काममुद्योतकारी ।
गतकलिलकलंक: सर्वदा य: स्ववृत्त:
स जयति जिनबिंबस्थापनाचार्यचार्या:(वर्य:) ॥१॥

यथाऽमरेन्द्रस्य पुलोम[जा]प्रिया नाराय[ण]स्याब्धिसुता बभूव ।
तथाभदेवस्य वैजैणिनाम्नी प्रिया सुधर्मा सुगुणा सुशीला ॥२॥
तयोः सुत: सद्गुणवान् सुवृत्त: सोमोऽभिध: कौमुदवृद्धिकारी ।
व्याघेरवालंबुनिधे: सुरत्नं जीयाच्चिरं सर्व्वजनीनवृत्ति: ॥३॥
श्रीमज्जिनोक्तानि समंजसानि शास्त्राणि लेभे स यथात्मशक्त्या ।
श्रीमूलसंघाब्धिविवर्द्धनेन्दो: श्रीपूज्यपाद-प्रभुमत्प्रसादात् ॥४॥

न ज्ञातृत्वाभिमानेन न यश:प्रसरेच्छया ।
कृति: किन्तु मदीयेयं स्वबोधायैव केवलं ॥५॥
शब्दशास्त्रविरोधं यत् यदागमविरोधि च ।
न्यूनाधिकं च यत्प्रोक्तं शोधितं तन्मनीषिभि: ॥६॥
श्रीमत्पादद्वियुगे जिनस्य नितरां लीन: शिवाशाधर: ।
सोम: सद्गुणभाजनं सविनय: सत्पात्रदाने रत: ॥
सद्रत्नत्रययुक् सदा बुधमनो(जना)ह्लादी चिरं भूतले ।
तेनाद्येन विवेकिना विरचिता टीका सुबोधाभिधा ॥

इति त्रिभंगीसारटीका समाप्ता ।

२२. यशोधरचरित्र (भ० श्रुतसागर)

आदिभाग :—

विद्यानंदीश्वरं देवं नाभिराजसमुद्भवं ।
स्तुवेहं मरुदेव्यंगसंभवं वृषभं जिनं ॥१॥

अकलंकं जिनाधीशमजितं विजयात्मजं ।
जितशत्रुमहाराजनंदनं प्रणमाम्यहं ॥२॥
समंतभद्रं सर्वज्ञं स्वस्ति श्रावस्तिसंभवं ।
दृढराज-सुषेणोत्थं संभवं चिंतयाम्यहं ॥३॥
शिवकोटिप्रदं वंदे शरण्यमभिनंदनं ।
स्वयंवर-महाराज-सिद्धार्था-स्वामिनी-सुतं ॥४॥
उमास्वामिनमर्हंतं श्रयामि सुमतीश्वरं ।
श्रीमेघरथराजेंद्र-मंगलाजं सुमंगलं ॥५॥
भद्रबाहुं जगद्भद्रं भजे पद्मप्रभं विभुं ।
कौशांबी-धरणाधीश-सुसीमा-सुतनूद्भवं ॥६॥
गुप्तिगुप्तं पुरीकाशीपतिश्रीप्रतिष्ठितं ।
सुपार्श्वं पृथिवीषेणा-सुतनीलांग[भं] भजे ॥७॥

(ग्रन्थ सामने न होनेसे अगले पद्य नहीं दिये जा सके ।)

अन्तभाग :—

श्रीमद्वीरजिनेन्द्र-शासन-शिरोरत्नं सतां मंडनं
साक्षादक्षयमोक्षकारि करुणाकृन्मूलसंघेऽभवत् ।
वंशे श्रीमत्कुंदकुंदविदुषो देवेन्द्रकीर्तिर्गुरुः
पट्टे तस्य मुमुक्षुरक्षयगुणो विद्यादिनंदीश्वरः ॥२७१॥

तत्पादपावनपयोरुहमत्तभृंगः श्रीमल्लिभूषणगुरुर्गरिमप्रधानः ।
संप्रेरितोऽहममुनाभयरुच्यभिख्ये भट्टारकेण चरिते श्रुतसागराख्यः ॥२७२॥
क्षांत्यार्जवादिगुणवेश्म तपोनिधानं चारित्रसद्म करुणानिधिराप्तपूज्यः ।
सद्धर्ममूर्तिरिह सोपि महेन्द्रकीर्तिराचार्यवर्यविनुतो [ऽनु]मतं चकार॥२७३॥

विद्यादिनंदिगुरुपूर्वगिरा च भक्त्या ।
संप्रार्थितश्च मुनिनाऽमरकीर्तिनाम्ना ।
श्रीरत्नराज-ऋषिणा गुरुभक्तिभाजा
राजाधिराज-नत-पादकज-द्वयेन ॥२७४॥

तर्क-व्याकरणार्हत-प्रविलसत्सिद्धांतसारामल-
छंदोलंकृतिपूर्वनव्यकृतधीसंश्रव्यकाव्योच्चये ।
चंचारुधिया प्रमोदितमतिर्भूयः कृताभ्यर्थनः
साधुश्रीमतिसागरेण कृतवानेतच्चरित्रं शुभं ॥२७५॥
गंधारसारनगरे संघाभ्यर्च्चनमनेकशः शुचा(श्रुत्वा) ।
श्रुतसागरेण रचितं शास्त्रमिदं सिद्धिदं भवतु ॥२७६॥

इति श्रीमद्भट्टारकश्रीविद्यानंदि-प्रियशिष्यसूरिश्रीश्रुतसागर-विरचिते यशोधरमहाराजचरिते अभयरुच्याऽभयमति-मारदत्त-यशोमति-कल्याणमित्र-कुसुमावली-श्रीसुदत्तभट्टारक-स्वर्गगमनवर्णनं नाम चतुर्थः परिच्छेदः ।

[आमेर-प्रति

२३. भविष्यदत्तचरित्र (विबुध श्रीधर)

आदिभाग :—

श्रीमतं त्रिजगन्नाथं नमामि वृषभं जिनं ।
इन्द्रादिभिः सदा यस्य पादपद्मद्वयी नता ॥१॥

(आगे चन्द्रप्रभ, शान्ति, पार्श्व, महावीर आदिकी स्तुति है)

यज्जिनेन्द्रमुखोद्गीतं यद्गणेशप्रकाशितं ।
यन्मुनीन्द्रगणैर्ग्रंथे कथितं ग्रंथवेदिभिः ॥८॥
श्रेमद्देदोमयूतायां(?)स्थितेन नयशालिना ।
श्रीलंबकंचुकाऽन्वूकनभोभूषणभानुना ॥९॥
प्रसिद्धसाधुधामैकदनुजेन दयावता ।
प्रवरोपासकाचार-विचाराहित-चेतसा ॥१०॥
गुरुदेवार्चनादानध्यानाध्ययनकर्मणा ।
साधुना लक्ष्मणाख्येन प्रेरितो भक्तिसंयुता ॥११॥
तदहं शक्तितो वक्ष्ये चरितं दुरितापहं ।
श्रीमद्भविष्यदत्तस्य कमलश्रीतनूभुवः ॥१२॥

समोपरोधतः संतः शृण्वंतु स्थिरमानसाः ।
निःश्रेयसाय मुंचंतु खलभावं खलाहदः (?)॥१३॥

अन्तभाग :—

चन्द्रप्रभस्य जगतामधिपस्य तीर्थे यातेयमद्भुतकथा कविकंठभूषा ।
विस्तारिता च मुनिनाथगणैः क्रमेण ज्ञाता मयाप्यपरसूरिमुखाम्बुजेभ्यः ॥५१॥
भक्त्याऽत्र ये चरितमेतदनूनबुद्ध्या शृण्वंति संसदि पठंति च पाठयंति ।
दत्वा धनं निजकरेण च लेखयंति व्युद्ग्राहभावरहिताश्च लिखंति संतः॥५२॥
ते भवंति बललक्षणशुद्धाः श्रीधरामलमुखा जनमुख्याः ।
प्राप्तचिंतितसमस्तसुखार्थाः शुभ्रकीर्तिधवलीकृतलोकाः ॥५३॥

इति श्रीभविष्यदत्तचरिते[1] विबुधश्रीधर-विरचिते साधुलक्ष्मण-नामांकिते श्रीवर्द्धन-नंदिवर्द्धन-मोक्षगमनवर्णनं नाम पंचदशः सर्गः समाप्तः ॥

२४. त्रिलोकसार-टीका (सहस्रकीर्ति)

आदिभाग :—

यस्योक्ति-शीतलसुधारसविप्रसंगाज्जन्माग्नितापपरितापित-भव्यजीवः ।
निर्वान्ति नेमिमवनम्य मुनीन्द्रचन्द्रं त्रैलोक्यसारवरवृत्तिमहं करिष्ये ॥२॥

सकलसैद्धान्तिकचक्रचूडामणि-श्रीनेमिचन्द्रभट्टारकोऽभिमतदेवता-श्री-नेमिजिननमस्कारप्रतिपादनार्थं निर्विघ्नाभिप्रेतार्थसिद्ध्यर्थं च स्वशास्त्रादौ नमस्कारमाह ।

अन्तभाग :—

असापल्यां सुधीः साधुर्वासुपूज्य-जिनालये ।
सहस्रकीर्तिराख्यातो नानाभव्यावबोधनः ॥१॥

---

१ इस ग्रन्थकी एक जीर्णप्रति, संवत् १४८६ आषाढ़ वदि ६ गुरुवार-की लिखी हुई, देहली-धर्मपुराके नया मन्दिरमें मौजूद है, जिसमें प्रारंभके दो पत्र नहीं और कुछ पत्र जीर्णोद्धार द्वारा नये भी शामिल किये गये हैं ।

नेत्राकृते त्रिजगती वर-बुद्धि-वृद्धा वृत्तिर्दिगम्बरधरार्णववंशकीर्णा।
यावज्जगद्भृतमिदं मरुतां श्रयेण तावत्सतामियमलं मुदमातनोतु ॥२॥
इति त्रैलोक्यसार-टीका समाप्ता।

२५. धर्मपरीक्षा (रामचन्द्र मुनि)

आदिभाग :—

प्रणिपत्य जिनं भक्त्या स्याद्वादवरनायकम्।
कथां धर्मपरीक्षाख्यामभिधास्ये यथागमम् ॥१॥

अन्तभाग :—

इति श्रीरामचन्द्रेण मुनिना गुणशालिना।
ख्याता धर्मपरीक्षा सा कृता कृतिरियं ततः ॥१॥
श्रीपूज्यपादसद्वंशे जातोऽसौ मुनिपुंगवः।
पद्मनन्दी इति ख्यातो भव्यव्यूह-प्रवन्दितः ॥२॥
तच्छिष्यो रामचन्द्राख्यो भद्रश्चारुगुणान्वितः।
वेदिता सर्वशास्त्राणां ख्यातो धर्मरताशयः ॥३॥
स च शुद्धव्रतोपेतः समयादिविवर्जितः।
समयः सर्वसत्त्वानां तत्प्रार्थनवशाद्वरः ॥४॥
यावद्व्योम्नि प्रवर्त्तन्ते शशांकरवितारकाः।
तावद्धर्मपरीक्षेयं वर्तिष्यति सदाशये ॥५॥
पद्मनिवासभूता हि कथा पद्मायिनी वरा।
तथा धर्मपरीक्षा च मिथ्यात्वाज्ञानध्वंसिनी ॥६॥
इति धर्मपरीक्षाकथा समाप्ता।

२६. करकण्डुचरित्र (भ० जिनेन्द्रभूषण)

आदिभाग :—

पार्श्वनाथजिनं वन्दे विश्वविघ्नौघनाशनम्।
कमठोपसर्ग-दैत्यारि-नाशनं सौख्य-कारणम् ॥१॥

अन्तभाग :—

वक्तुं सर्वमिह क्षमः किल भवेत्कस्योत्तमा भारती ॥१५॥

इति श्रीमुमुक्षु-सिद्धान्तचक्रवर्ति-श्रीकुन्दकुन्दाचार्यानुक्रमेण श्रीभट्टारक-शिवभूषण-विरचिते श्रीमज्जिनेन्द्रपुराणान्तर्गत-भगवत्पूजाफल-व्यावर्णने श्रीकरकण्डु-सहस्रारकान्तिवर्णनो नाम चतुर्थोऽधिकारः सम्पूर्णः ।

करकण्डुकथा सम्पूर्णा ।

२७. अनन्तजिन-व्रतपूजा (भ० गुणचन्द्र)

आदिभाग :—

श्रीसर्वज्ञं नमस्कृत्य सिद्धं साधूंस्त्रिधा पुनः ।
अनन्तव्रतमुख्यस्य पूजां कुर्वे यथाक्रमम् ॥१॥

अन्तभाग :—

इत्यनंतविधेः पूजां व्यरचद्गुणचंद्रकः ।
श्लोकः सप्तशती पंचसप्तत्यूना यतीश्वरः ॥१॥
संवत्षोडशत्रिंशत्रैष्यफलके(१६३३) पक्षेऽवदाते तिथौ
पक्षत्यां गुरुवासरे पुरुजिनेट्-श्रीशाकमार्गे पुरे ।
श्रीमद्धुम्बडवंशपद्मसविता हर्षाख्यदुर्गो वणिक्
सोयं कारितवाननंतजिनसत्पूजां वरे वाग्वरे ॥२॥

श्रीमूलसंघेघविघातिनीह प्रद्योतमानेऽन्यमतानि नेशुः ।
सारस्वतो गच्छ इहैव नंद्यात् श्रीमद्बलात्कारगणाभियुक्ते ॥३॥
श्रीरत्नकीर्तिभगवज्जगतां वरेण्यश्चारित्ररत्ननिवहस्य बभार भारम् ।
तद्दीक्षितो यतिवरो यशकीर्तिकीर्तिश्चारित्ररंजितजनोद्वहिता सुकीर्तिः ॥४॥

तच्छिष्यो गुणचंद्रसूरिरभवच्चारित्रचेतोहर-
स्तेनेदं व्रतपूजनं जिनवरानन्तस्य युक्त्याऽरचि ।
येऽत्र ज्ञानविकारिणो यतिवरास्तैः शोध्यमेतद्ध्रुवं
नंद्यादारविचंद्रमक्षयतरं संघस्य मांगल्यकृत् ॥५॥

इत्याचार्यगुणचंद्रविरचिता श्रीअनन्तनाथजिनपूजा उद्यापनसहिता समाप्ता ।

२८. पद्मपुराण (भ० धर्मकीर्ति)

आदिभाग :—

शक्राली-मौलि-रत्नांशु-वारिधौत-पदाम्बुजं ।
ज्ञानादिमहिमव्याप्तविष्टपं विष्टपाधिपं ॥१॥
मुनिसुव्रतनामानं सुव्रताराधितक्रमं ।
वंदे भक्तिभरानम्रः श्रेयसे श्रेयसि स्थितं ॥२॥

अन्तभाग :—

अथाभवन्मूलसुसंघ एव गच्छे सरस्वत्यधिके(भिधे) गणे च ।
बलात्कृतौ श्रीमुनिपद्मनन्दी श्रीकुंदकुंदान्वयजप्रसूतिः ॥२४॥
देवेन्द्रकीर्तिश्च बभूव तस्य पट्टे महिष्टे सुमहानुभावः ।
त्रिलोककीर्तिस्तत तत्र(एव) दीक्षो भट्टारकस्तत्पदलक्ष्यनिष्ठः ॥२५॥
सहस्रकीर्तिर्मुनिवृन्दसेव्यस्तत्पट्टपाथोधिनिशाधिनाथः ।
तदीयशिष्यः पद-पद्मनन्दी बभूव नाम्ना मुनिपद्मनन्दी ॥२६॥
पट्टे तदीयेऽखिलसंघसेव्यो यशःसुकीर्तिः शुभकीर्तिसिंधुः ।
बभूव भट्टारक-सत्पदस्थो मुनिः स्मरारेः हनने प्रवीणः ॥२७॥
तत्पट्टपंकेजविकाशनेयः साम्यं विभर्त्तीह सहस्रभानोः ।
हतस्मराजितदुःकषायो(?) विनष्टदुर्भावचयो महात्मा ॥२८॥
यं वीक्ष्य लोके व्रतभासुरांगं तपस्विनं शास्त्रविदं मुनीशं ।
भजंति मिथ्यात्वमयं न जातु क्रियापरं शीलनिधिं सुशांतं ॥२९॥
यं सेवमाना सततं सुशिष्या विज्ञात-तत्त्व-व्रत-भासुरांगाः ।
भवंति नूनं जगती-प्रकाशास्तपःकृशांगा रविणो गुणोघैः ॥३०॥
यं सेवमानः समकुक्षिजातं मुनीशमासीदुद्धररत्नपालः ।
पटुत्व-वाग्मित्व-कवित्व-वेत्ता ·········सद्गुणरत्नपात्रं ॥३१॥
एवं विधोऽसौ मुनिसंघसेव्यो भट्टारको भासितदिक्समूहः ।
संघस्य कल्याणततिः प्रदेया माम्ना गुरुः श्रीललितादिकीर्तिः ॥३२॥

तच्छिष्यस्तत्पदस्थो व्रतनिचययुतो जैनपादाब्जभृंगो
नाम्ना धर्मादिकीर्तिर्मुनिविमलमनास्तेन चैतत्पुराणं।
स्वल्पप्रज्ञेन दृब्धं निजदुरितचयप्रक्षयाय हिताय
भव्यानां च परेषां श्रवण-सुपठने प्रोद्यतानामजस्रं ॥३३॥
मूलकर्ता पुराणस्य श्रीजिनश्चोत्तरस्तथा।
गणीशो यतयोन्ये च उत्तरोत्तरकर्तृकाः ॥३४॥
इदं श्रीरविषेणस्य पुराणं वीक्ष्य निर्मितः।
चिरं स्थेयात् क्षितौ भव्यैः श्रुतं चाधीतमन्वहं ॥३५॥
संवत्सरे द्व्यष्टशते मनोज्ञे चैकोनसप्तत्यधिके(१६६९) सुमासे।
श्रीश्रावणे सूर्यदिने तृतीयातिथौ च देशेषु हि मालवेषु ॥३६॥

× × × ×

इति श्रीपद्मपुराणे भट्टारकश्रीधर्मकीर्तिविरचिते पद्मदेवनिर्वाणगमनं नाम चतुश्चत्वारिंशः पर्वः ॥४४॥

२९. हरिवंशपुराण (भ० धर्मकीर्ति)

आदिभाग :—

श्रीमंतं त्रिजगन्नाथं नेमिनाथं जिनाधिपम्।
अरिष्टखंडने नेमिं वन्देऽनन्तगुणार्णवम् ॥१॥
पुरुदेवादि-वीरान्तान् शेषांस्तीर्थकरान्मुदा।
वन्देऽनन्तगुणालीढान्प्रातिहार्यादिभूषितान् ॥२॥
सप्तत्यग्रशतक्षेत्र्यान्सतो भूतान्भविष्यतः।
नमामि श्रीजिनान् घातिकर्मसंघातघातकान् ॥३॥
सिद्धानष्टगुणोपेतान्पंचाचारादिसंगतान्।
आचार्यान्पाठकान्वंदे तथासाधूंस्तपोधनान् ॥४॥
जिनेन्द्र-वक्त्र-संजातां सुरासुरमुनीडिताम्।
भारतीं नौमि दुर्जाड्य-नाशिनीं विश्वदीपिकाम् ॥५॥

वन्दे **वृषभसेनादीन् गौतमान्तान्** गणेशिनः ।
चतुर्ज्ञानधरान्सम्यक् पूर्वाङ्ग-रचनोद्यतान् ॥६॥
कुन्दकुन्दादिकाचार्यान् कवीन्द्रान्नौमि भक्तितः ।
प्रदीपायितमेतत्र (?) यैर्मिथ्यात्वतमोवृते ॥७॥
तथा **ललितकीर्त्याख्यमीडे** भट्टारकं गुरुम् ।
क्रियते यत्प्रसादेन कृतिरेषा बुधोचिता ॥८॥

अन्तभाग :—

वीरेणोक्तं पुरा चैतद्गौतमाद्यैस्ततोऽखिलम् ।
श्रुतकेवलिभिस्तद्वत्ततः श्रीगुणभद्रकैः ॥६०॥
संक्षेपेण च तद्वीक्ष्य प्रोक्तं तच्च मया पुनः ।
उक्तमेतच्चिरं नंद्यात्पठितं पाठितं बुधैः ॥६१॥

नानाकथातत्त्वरहस्यपूर्णं पूजाव्रतत्याग-तपोगुणाढ्यम् ।
स्वर्गापवर्गोरुनिदानभूतं पुराणमेतत्सुचिरं प्रजीयात् ॥६२॥
श्रीमूलसंघेऽजनि **कुन्दकुन्दः** सूरिर्महात्माखिलतत्त्ववेदी ।
सीमंधरस्वामिपदप्रवन्दी पञ्चाह्वयो जैन-मत-प्रदीपः ॥६३॥
तदन्वयेऽभूद्यशकीर्तिनामा भट्टारको भाषितजैनमार्गः ।
तत्पट्टवान् श्रील**लितादिकीर्ति**र्भट्टारकोऽजायत सत्क्रियावान् ॥६४॥

जयति **ललितकीर्तिर्ज्ञा**ततत्त्वार्थसार्थो
नय-विनय-विवेक-प्रोज्वलो भव्यबन्धुः ।
जनपदशतमुख्ये **मालवे**ऽलं यदाज्ञा
समभवदिह जैन-द्योतिका दीपिकेव ॥६५॥
तत्पट्टाम्बुजहर्ष-वर्ष-तरणिर्भट्टारको भासुरो
जैनग्रन्थविचार-केलिनिपुणः श्री**धर्मकीर्त्याह्वयः** ।
तिसूक्ष्मामलानन्तसौख्या विबाधाः प्रसिद्धाः सुसिद्धाः प्रयच्छन्तु शं नः ॥३॥

मनोज्ञार्थचिन्तामणिश्रीनिवासं पवित्रं चरित्रं समं ये दृगाद्यम् ।
स्वयं सञ्चरन्तेऽन्यमाचारयन्ते भवन्त्विष्टिदाः सूरयः सर्वदा नः ॥४॥

अनेकान्ततत्त्वांबुजोल्लाससूर्याः सदैकान्तमिथ्यातमोध्वंसवर्याः ।
पराध्यापकाः पाठकान् पाठयन्तः प्रबोधं दधन्तां शुभं शाश्वतं नः ॥५॥
त्रिदण्डप्रमुक्ताः सुयोगोपयुक्ताः प्रमादोज्झिताः सिद्धशुद्धोपयोगाः ।
सुश्रृङ्गारयोनीनस्वर्भानुभावाः सदा साधवः संतु ते सिद्धिदा नः ॥६॥
अघौघ-संघट्टितविघ्न-संघ-विघातका मारमहेभसिंहाः ।
भवन्तु पञ्चापि जिनेश्वराद्याः सुशाश्वतं वैबुधसम्प्रधार्ये ॥७॥
सल्लक्षणोज्ज्वलतनुर्वरतर्कबाहुः स्याद्वादपीवरपयोधरभारभुग्ना ।
मुक्तात्मवृत्तसदलंकृतिहारभूषा वाग्देवता मम तनोतु मनीषितानि ॥८॥

गुणिगणधरकीर्ति सोमसेनोपरोधा—
दकृत निकृतिदोषांध्वान्तविध्वंसकर्त्रीम् ।
दिनमणिरुचिभावां भासितार्थां सुटीकां,
श्रुतममृततरङ्गिण्याख्ययाध्यात्मपूर्वाम् ॥९॥

कुन्देन्दुकांतिहरहासविलासशुभ्रं, कांतं यशः प्रतिविधातुमनल्पकल्पम् ।
कर्णैः स्वरैरवितथार्थविचारसारा, साक्षान्मया विरचिता शिवसौख्यदेयम् ॥१०।

मात्सर्यमुत्सृज्य विचार्य चार्य्या सत्तत्त्वसंदेशनजं गुणौघम् ।
ग्राह्यागुणज्ञैर्गुणकस्वदक्षैः सन्मोक्षमार्गाधिगमाय टीका ॥११

जिनं प्रणम्य प्रणतं सुरेशैः कृते कृतार्थैं मुनिसोमदेवैः ।
मया स्वभक्त्या क्रियते विचित्रं निबंधनं ध्यानविधौ सुबोधम् ॥१२॥

निखिलसुरासुरसेवावसरमायातसुरसम्बोधनावधारितधर्मावसरण (णं) अमरोरगनरेन्द्रश्रीकल्यानोकहारामोल्लासामृताम्भोधरायमाण (णं) महा-परमपञ्चकल्याणकोकनदकाननोत्पत्तिसार (रं) भवाम्भोधिसमुत्तरणैकसेतुबन्धं सम्यक्त्वरत्नं गीर्व्वाणगणा [न] नुग्राहयता, अष्टादशसागरोपमकोटीकोटीं वा यावन्नष्टत्वाद्दयादमत्यागादिस्वभावस्य धर्मस्य भरते धर्मकर्माणि प्रवर्तयन् [तु]भगवानिति जाताकूतपरिपाकेन समाधि(वि) र्भविष्यदासन्नमृत्युं वैराग्य-योग्या(गा)थ नीलंयसां प्रहितां गीर्व्वाणेश्वरेण, तां च शृङ्गारादिरसाभिनयदक्षां हाव-भाव-विभ्रमविलासवतीं शान्तरसानन्तरमेव नश्वरस्वभावां विभाव्या-त्मनोऽनश्वरस्वभावतां चिकीर्षुरादिदेव इत्थं योगमुद्रा मुन्मुद्रितवानित्याह—

अन्तभाग :—

श्रीसोमदेवमुनिनोदितयोगमार्गो व्याख्यात एव हि मया स्वमतेर्बलेन ।
संशोध्य शुद्धधिषणैर्हृदये निधेयो योगीश्वरोत्वमचिराय समाप्तुकामैः ॥१॥

[श्री] सोमसेनप्रतिबोधनार्थं धर्माभिधानोन्नयशःस्थिरार्थाः ।
गूढार्थसंदेहहरा प्रशस्ता टीका कृताऽध्यात्मतरङ्गिणीयम् ॥२॥

जिनेशसिद्धाः शिवभावभावा सुसूरयो देशकसाधुनाथाः ।
अनाथनाथा मथितोरुदोषा भवंतु ते शाश्वतशर्म्मदा नः ॥३॥

चंचत्चंद्रमरीचिवीचिरुचिरे यच्चारुरोचिश्चये,
नम्राङ्गैः सुरनायकैः सुररुचे देवाब्धिमध्यैरिव ।
शुक्लध्यानसितासिशासितमहाकर्मारिकक्षोदयो—
देयात्तेऽभव संभवां शुभतमां चंद्रप्रभः संपदम् ॥४॥

त्रिदशवर्मातितुल्यो गुर्जरात्राभिधानो धनकनकसमृद्धो देशनाथोऽस्ति देशः।
असुरनरसुरामाशोभिभोगाभिरामो परदिगवनिनारीवक्त्रभाले ललामः ॥५॥

शश्वच्छ्रीशुभतुङ्गदेववसतिः संपूर्णपण्यापणा—
शौण्डीयोद्भटवीरधीरविलता श्रीमान्यखेटोपमा।
चंचत्कांचनकुम्भकर्णविसरैर्जैनालयैर्भ्राजिता,
लंका वास्ति विलासशालनिलयामंदोदरीशोभिता ॥६॥

वरवटवटपल्ली तत्र विख्यातनामा वरविबुधसुधामा देववासोरुधामा।
शुभसुरभिसुरम्भादेवरम्भाभिरामा सुरवसतिरिवोच्चैरप्सरोभासमाना ॥७॥

स्फूर्जद्‌बोधगणेभवद्यतिपतिर्वाचंयमः संयमी,
जज्ञे जन्मवतां सुपोतममलं यो जन्मयादोविभोः।
जन्यो यो विजयी मनोजनृपते र्जिष्णोर्जगज्जन्मिनाम्,
श्रीमत्सागरनंदिनामविदितः सिद्धांतवार्धेर्विधुः ॥८॥

स्याद्वादसात्मकतपोवनितालला मो भव्यातिसस्यपरिवर्द्धननीरदाभः।
कामोरुभूरुहविकर्तनसंकुठारस्तस्माद्विलोभहननोऽजनि स्वर्णनन्दी ॥९॥

तस्माद् गौतममार्गगो गुणगुणैर्गम्यो गुणिग्रामणी—
गीतार्थो गुरुसंगनागगरुडो गीर्वाणगीर्गोचरः।
गुप्तिग्रामसमग्रतापरिगतः प्रोग्रग्रहोद्‌गारको,
ग्रन्थग्रंथिविभेदको गुरुग्रामः श्रीपद्मनन्दी मुनिः ॥१०॥

आचार्योचितचातुरीचयचितश्चारित्र चञ्चुःशुचि—
श्चार्वीसंचयचित्रचित्ररचनासंचेतनेनोच्चकैः।
चित्तानन्दचमत्कृतिप्रविचरत्प्राज्ञप्रचेतोमतां,
प्राभूच्चारुविचारणैकनिपुणः श्रीपुष्पदन्तस्ततः ॥११॥

समभवदिहचातश्चन्द्रवत्कायकान्तिस्तदनुविहितबोधो भव्यसत्कैरवाणाम्।
मुनिकुवलयचन्द्रः कौशिकानन्दकारी, निहिततिमिरराशिश्चारुचारित्ररोचिः॥१२

तस्मात्तीव्रमहातपस्तपनकृत्तेजः प्रतप्तान्तरम्।
कर्मोत्तुङ्गताडगतारलहरीतोयं तरां शोषितम्।

रत्यामाचरणे शुचौ रतिपतिर्येनोत्पतंगी कृतः ।
कीर्त्या शारदनीरदेन्दुसितया श्वेतीकृताशामुखः ॥१३॥
भवभयपरिभावी भव्यराजीवबन्धु—
र्मतमितहितवादी बुद्धिवादावनन्दी ।
गुणिगणधरकीर्तिः कोविदानन्दहेतुः ।
समजनि जनपूज्यो वन्दिवृन्दाभिवंद्यः ॥१४॥
आसन्नभव्यशुभसस्यविभूतिकर्त्रीं सारार्थदेशनपरां चिरमेघमालाम् ।
सार्द्रान्तरः ससमयो निखिलाशपूरस्तस्तार यद्वदिह तद्वदिमां सुटीकाम् ॥१५॥
तथ्यात्माधर्थसम्वादाध्यात्मामृततरङ्गिणीम् ।
सोमदेवध्यानविधौ गणधरकीर्तिर्व्यधात् ॥१६॥
एकादशशताकीर्णे नवासीत्युत्तरे परे ।
सम्वत्सरे शुभे योगे पुष्यनक्षत्रसंज्ञके ॥१७॥
चैत्रमासे सिते पक्षेऽथ पञ्चम्यां रवौ दिने ।
सिद्धा सिद्धिप्रदा टीका गणभृत्कीर्तिविपश्चितः ॥१८॥
निस्त्रिंशतर्जितारातिविजयश्रीविराजनि ।
जयसिंहदेवसौराज्ये सज्जनानन्ददायिनि ॥१९॥
यावज्जैनं शासनं शासनानां, जीवादीनां स्याद्नेकात्मकानाम् ।
यावद्द्यौर्गौर्गोपतिर्यावदाशाः स्थेयाट्टीका तावदेषा जगत्याम् ॥२०॥

१३२. चन्द्रप्रभपुराण (पं० शिवाभिराम)

आदिभाग :—

श्रीमते परमज्ञान-साम्राज्य-पदभागिने ।
नमोऽर्हते महाभर्त्रेऽनंतसंसृतिभीमुषे ॥१॥
अनादिनिधनानन्तज्ञानानंदैकमूर्तये ।
जगतां स्वामिने कर्त्रे नमो तं कुलकृत्तुजे ॥२॥
तमीशं स्वामिनं वन्दे सुरतारागणावृतं ।
स्ववाक्किरणसन्दोह-सुनन्दित-जगत्त्रयम् ॥३॥

अनेकान्तमतिः कुर्यादनन्यगुणगौरवः (वं)।
सिद्धयर्थदायिनी शांतिरसावतुलविक्रमी ॥४॥
सोऽस्तु श्रीमन्महावीरः सतां सिद्धौ जगत्त्रये।
यन्नामश्रुतिमात्रेण भजन्ति भविनः सुखम् ॥५॥
त्रिश्रीसमन्वितान् शेषान् पुराणार्थ-प्रकाशकान्।
जिनाधिपानहं नौमि तत्सुखाप्त्यै सुखाकरान् ॥६॥
जिनेन्द्रवक्त्रजां वन्दे सप्तभंगांगवादिनीम्।
केवलज्ञान-जननीं तु स्तुत्यां सम्यक्सरस्वतीम् ॥७॥
योग्यतां यांति यास्यन्ति सत्पदं पुरुषोत्तमाः।
यामाराध्य समाराध्यामाराध्यैस्तां स्तुवेऽनघाम् ॥८॥
रत्नत्रयधरान्वन्दे बाह्याभ्यन्तरभेदतः।
सर्वसंगविनिर्मुक्तान् गुरून्सद्गुणगौरवान् ॥९॥
विष्णवादिभद्रबाह्वंतानां पादस्मरणं सदा।
करोमि सिद्धये कृत्स्नश्रुतकेवलिनामहं ॥१०॥
श्रीमत्समन्तभद्रस्य जयन्ति वचनान्यलं।
यत्सम्प्रद्योतिते मार्गे न स्खलन्ति महाधियः ॥११॥
अकलंकगुरुः केन भुवने न प्रणम्यते।
यद्वाक्शरैश्च बौद्धानां बुद्धिर्वैधव्यतां गता ॥१२॥
पुराणसंततिर्यस्य त्वगते प्रस्फुटं गता।
स्मरामि जिनसेनस्यांघ्री यौ सद्भिः प्रवंदितौ ॥१३॥
पद्मनन्द्यादयः सर्वे पूज्ये ज्याः सत्सूरयः सुरैः।
संस्तुतास्ते दिशंत्वत्र मतिसर्वार्थभासिनीम् ॥१४॥
स्वसिद्धयर्थं नमस्कृत्य देव-श्रुत-मुनीश्वरान्।
वच्मि चन्द्रप्रभस्येदं पुराणं च पुलाकतः ॥१५॥
गुणभद्रादिभिर्पूज्यैर्भदन्तैर्यन्निरूपितम्।
तत्करोमि विशक्तोऽहं तत्पादाम्बुजसेवनात् ॥१६॥

अन्तभाग :—

श्रीमत्कुम्भमहाविशुद्धनगरे जैनास्पदैर्वासिते,
शुद्धश्रीद्धमहाजनप्रभृतिभिर्न्नित्यं च सद्भावतः ।
तारासिंह इतिद्धभून्नृपशिरोरत्नप्रभाचुम्बित-
पादाम्भोज-मनोहर-द्युतिवरः शत्रूत्तमांगैर्न्नतः ॥५१॥

श्रीमदबृहद्गौर्जरवंशभूषणः प्रतापसंतापित-शत्रुशासनः ।
ताराहरिः क्षत्रियवृत्तिचन्द्रमा विशुद्धमार्गाधिपतिर्जयत्यसौ ॥५२॥
तत्सत्पदाम्बुजविभूषणमित्रमूर्तिर्विद्वेषमेकपरिशोषणमित्रमूर्तिः ।
अन्यायमार्गकुमुद्युति-मित्रमूर्तिः पुत्रो बभूव बलवान् रणमल्ल एषः ॥५०॥
दिल्ली-नृपेशाधिपति-प्रमान्यः शौर्य्यादिभिः ख्यातगुणैर्गरीयान् ।
पट्टे तदीये जिनशुद्धमार्गी सामन्तसिंहो नृपराजराजः ॥५४॥
दिगम्बराचार्यगुरोः प्रसादान्मलक्षयात्प्राप्तजिनेन्द्रधर्मः ।
अपारभट्टावलि-वंदितः सत्सामन्तसिंहः नृपतिः सुजीयात् ॥५५॥
तत्पट्ट-पौरुष-महोदय-पद्मसिंहो विद्वेषपद्मनिकरोदयपद्मसिंहः ।
तत्सूनूरद्भुत महोदयपद्मसिंहो जातः समुन्नतमतिद्युतिपद्मसिंहः ॥५६॥
शिवानतानन्दमनोहरांगः शिवाभिरामैरनुशासितात्मा ।
शिखाभिरामद्युतिवारिवाहः शिवाभिरामो द्वितियाभिधानः ॥५७॥

अभुक्तभोगद्युतिराजराजो गृहस्थितब्रह्मपदाधिराजः ।
विद्याविनो [दो] धमराजिराजः कालं स निन्ये जिनराजभक्त्या ॥५८॥

वीरोति शीलादिगुणोज्वलांगा निर्वाणवंशोदधि-पद्मजाभूत् ।
अर्हत्पदद्वन्द्वगताशया या सा वामला पद्महरेः पतीव्रा ॥५९॥

तस्योपदेशाग्रहतो मयेदं चरित्रमुक्तं जिनचन्द्रराज्ञः ।
शिवाभिरामेण विशुद्धसिद्ध्यै नवाभिमानेन कवित्वयुक्तैः ॥६०॥

यावच्च[सच्च,]न्द्रः-दिवाकरौ द्वौ यावत्सुराद्रिश्च जिनवृष(व्रत)श्च,
भ(या)वत्सतां वृत्तिरतिप्रशस्ता तावत्समानन्दतु एष ग्रन्थः ॥६१॥

क्षुत्तृड्रोगमलादिदोषविमुखाः श्रीमज्जिनेन्द्राधिपाः,
सम्यक्त्वादि-गुणाष्टकैरनुपमाः सिद्धा विशुद्धाः सदा।
पंचाचार-परायणादि-सुगुणाख्यातारश्च सत्साधवो,
हिंसाभाव-विकार-वर्जित-नृपाः कुर्वन्तु वो मंगलम् ॥६२॥
श्रीवर्मा नृपराजपूजितपदोदेवस्ततः श्रीधरः,
षट्खंडाधिपतिर्महासुरपतिः श्रीपद्मनाभो नृपः।
सत्सामर्थ्यमहोदयाद्भुतसुखी सर्वार्थसिद्धीश्वर—
श्चन्द्रेशः कुरुताच्छिवं शिववधूयुक्तः सदा वश्चनः ॥६३॥
भूपा भवन्तु बलिनः प्रबलेन यौधे शांताः प्रजाश्च कलिकालकला-विनष्टाः।
विद्या-विनोद-विशदात्मगुणाः स्वयं वा व्याख्यानवर्तिनि तमीशपतेः पुराणे ॥६४

पठकः पाठकश्चास्य वक्ता श्रोता च भाविकः।
विस्तारकः शिवं लेभे भुक्त्वेंद्रादि-सुखं महत् ॥६५

इत्यष्टमजिन-पुराण-संग्रहे श्रीमत्पद्महरि-शिवाभिराम (मा) वनिपसूनुकृतौ भगवन्निर्वाणगमनांतमंगलाचरण-कविसमुत्पत्ति-निरूपणाख्याभिधानः-सप्तविंशतिमः सर्गः ॥२७॥

१३३—शब्दार्णवचन्द्रिका-वृत्ति (सोमदेव)

आदिभागः—

श्रीपूज्यपादममलं गुणनन्दिदेवं, सोमामरव्रतिप-पूजित-पादयुग्मम्।
सिद्धं समुन्नतपदं वृषभं जिनेन्द्रं, सच्छब्दलक्षणमहं विनमामि वीरम् ॥१॥
श्री मूलसंघजलजप्रतिबोधभानो, र्मेघेन्दुदीक्षित-भुजगसुधाकरस्य।
राद्धान्ततोयनिधिवृद्धिकरस्य वृत्तिं, रेभे हरींदु-यतये वरदीक्षिताय ॥२॥

अन्तभागः—

श्रीसोमदेवयति-निर्मितमादधाति, यानौःप्रतीत-गुणनन्दित-शब्दवार्धौ।
सेयं सताममलचेतसि विस्फुरन्ती, वृत्तिः सदा नुतपदा परिवर्तिषीष्ट ॥१॥

स्वस्ति श्रीकोल्लापुरदेशान्तर्वर्त्यार्जुरिकामहास्थान युधिष्ठिरावतार-महामण्डलेश्वर गंडरादित्यदेवनिर्मापितत्रिभुवनतिलकजिनालये

श्रीमत्परमपरमेष्ठिश्रीनेमिनाथश्रीपादपद्माराधनबलेन वादीभवज्रांकुश-श्रीविशालकीर्तिपंडितदेव वैयावृत्यतः श्रीमच्छिल्लाहारकुलकमलमार्तण्डतेजः पुञ्जराजाधिराजपरमेश्वरपरमभट्टारकपश्चिमचक्रवर्ति श्रीवीरभोजदेव विजय-राज्ये शकवर्षैकसहस्रैकशतसप्तविंशति ११२७ तमक्रोधनसम्वत्सरे स्वस्ति-समस्तानवद्यविद्याचक्रवर्ति श्रीपूज्यपादानुरक्तचेतसा श्रीमत्सोमदेवमुनीश्वरेण विरचितेयं शब्दार्णवचन्द्रिकानाम वृत्तिरिति । इतिश्रीपूज्यपादकृत जैनेन्द्रमहाव्याकरणं सम्पूर्णम् ॥

(श्रीजैनमन्दिर पंसारीटोला, इटावा प्रति)

१३४. द्रव्यसंग्रहवृत्ति (पं० प्रभाचन्द्र)

आदिभागः—

नत्वा जिनार्कमपहस्तितसर्वदोषं, लोकत्रयाधिपतिसंस्तुतपादपद्मम् ।
ज्ञान-प्रभा-प्रकटिताखिलवस्तुसार्थं, षड्द्रव्यनिर्णयमहं प्रकटं प्रवक्ष्ये ॥१॥

अहं प्रवक्ष्ये कथयिष्ये कं ? षड्द्रव्यनिर्णयं षरणां द्रव्याणां जीवादीनां निर्णयं निश्चयं कथं प्रवक्ष्ये प्रकटं यथा भवति किं कृत्वा ? पूर्वं नत्वा नमस्कृत्य कं ? जिनार्कं जिनादित्य कथंभूतं ? अपहस्तितसर्वदोषं अपहस्तिता निराकृताः सर्वदोषाःमृषादयो येन स अपहस्तितसर्वदोषस्तं आदित्येत्यादि अपहस्तिता निराकृता सर्वदोषा रात्रिः । पुनः कथंभूतं ? लोकत्रयाधिपतिसंस्तुत-पादपद्मं लोकत्रयस्याधिपतयः स्वामिनो धरणेन्द्रनरेन्द्रसुरेन्द्रास्तैर्वंदितौ पादावेव पद्मौ यस्य स लोकत्रयाधिपतिभिः ब्रह्माविष्णुमहेश्वरैरभिः संस्तुत पादपद्म इति परसमयवचनं । पुनः कथंभूतं ? ज्ञानप्रभाप्रकटिताखिलवस्तु-सार्थं ज्ञानं केवलज्ञानं तदेव प्रभा तया प्रकटिताः प्रकाशिताखिलवस्तूनां निखिलपदार्थानां सार्थः समूहो येन स ज्ञानप्रभाप्रकटिताखिलवस्तुसार्थस्तं आदित्येनापि प्रभालोचनगोचराः सर्वपदार्थाः प्रकटिता इति क्रियाकारक-सम्बन्धः । अथेष्टदेवताविशेषं नमस्कृत्य महामुनिसैद्धान्तिक—श्रीनेमिचन्द्र प्रतिपादितानां षड्द्रव्याणां स्वल्पबोधप्रबोधार्थं संक्षेपार्थतया विवरणं करिष्ये ।

अन्तभागः—

इति श्रीपरमागमिकभट्टारक-श्रीनेमिचन्द्रविरचित-षड्द्रव्यसंग्रहे श्रीप्रभाचन्द्रदेवकृतसंक्षेपटिप्पणकं समाप्तम् ॥

१३५. पंचास्तिकाय-प्रदीप (प्रभाचन्द्राचार्य)

आदिभागः—

प्रणम्य पादाम्बुरुहाणि भक्त्या, मनोवचःकायकृदार्हदीशां ।
प्रवक्ष्यथास्त्यांगविचारसूत्री, स्फुटीकृते टिप्पणकं विशिष्टम् ॥१॥

अथ श्रीकुमारनन्दिशिष्यः श्रीशिवकुमारमहाराजाद्यन्तेवासिनां सम्बोधनपराः विलोकितपूर्वविदेहश्रीसीमंधरस्वामितीर्थंकरपरमदेवाः पञ्चास्तिकाय-षट्द्रव्य-सप्ततत्त्व-नवपदार्थप्रतिपादनपराः नास्तिकत्वनिराशाय शिष्टाचार-प्रतिपालनाय पुण्यप्राप्ति-निर्विघ्न [ग्रन्थसमाप्त्यर्थं] चाभिमतदेवतानमस्कार-सूत्रं श्रीमत्कुन्दकुन्दाचार्या प्राहुः—

अन्तभागः—

इति पण्डित श्रीप्रभाचन्द्रविरचिते पंचास्तिकायप्रदीपे मोक्षमार्ग-नवपदार्थ चूलिकाधिकारः समाप्तः ।

सन्मार्गतत्त्वविविधार्थमणिप्रकाशः ।
श्रीमत्प्रभेन्दुरचितोनविदन्तरर्थ्यः (?) ॥१॥
ज्योतिप्रभाप्रहतमोहमहान्धकारः
पंचास्तिकाय-भुवने ज्वलति प्रदीपः ॥२॥

१३६. आत्मानुशासनतिलक (प्रभाचन्द्राचार्य)

आदिभाग :—

वीरं प्रणम्य भव-वारिनिधिप्रपोतमुद्योतिताऽखिलपदार्थमनल्पपुण्यम् ।
निर्वाणमार्गमनवद्यगुणप्रबन्धमात्मानुशासनमहं प्रवरं प्रवक्ष्ये ॥१॥

बृहद्धर्मभ्रातुर्लोकसेनस्य विषयव्यामुग्धबुद्धेः संबोधनव्याजेन सर्वोपकारकं सन्मार्गमुपदर्शयितुकामो गुणभद्रदेवो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्टदेवताविशेषं नमस्कुर्वाणो लक्ष्मीत्याद्याह—

अन्तभाग :—

मोक्षोपायमनन्यपुण्यममलज्ञानोदयं निर्मलम् ,
भव्यार्थं परमं प्रभेन्दुकृतिना व्यक्तैः प्रसन्नैः पदैः ।
व्याख्यानं वरमात्मशासनमिदं व्यामोहविच्छेदतः,
सूक्तार्थेषु कृतादरैरहरहश्चेतस्यलं चिंत्यताम् ॥१॥

इति श्रीआत्मानुशासनतिलकं प्रभाचन्द्राचार्यविरचितं सम्पूर्णम् ।

१३७. आराधनाकथाप्रबन्धः (प्रभाचन्द्राचार्य)

आदिभाग:—

प्रणम्य मोक्षप्रदमस्तदोषं, प्रकृष्टपुण्यप्रभवं जिनेन्द्रम् ।
वक्ष्येऽत्रभव्यप्रतिबोधनार्थमाराधनासत्सुकथाप्रबन्धम् ॥१॥

अन्तभाग:—

यैराराध्य चतुर्विधामनुपमामाराधनां निर्मलाम् ।
प्राप्तं सर्वसुखास्पदं निरुपमं स्वर्गापवर्गप्रदा ।
तेषां धर्मकथा-प्रपञ्चरचना स्वाराधना संस्थिता ।
स्थेयात् कर्मविशुद्धिहेतुरमला चन्द्रार्कताराबधि ॥१॥
सुकोमलैः सर्वसुखावबोधैः पदैः प्रभाचन्द्रकृतः प्रबन्धः ।
कल्याणकालेऽथ जिनेश्वराणां, सुरेन्द्रदन्तीव विराजतेऽसौ ॥२॥

श्रीजयसिंहदेवराज्ये श्रीमद्धारानिवासिना परापरपञ्चपरमेष्ठिप्रणामोपार्जिताऽमलपुण्यनिराकृतनिखिलमलकलंकेनश्रीमत्प्रभाचंद्रपण्डितेन आराधनासत्कथाप्रबन्धः कृतः ।

१३८. प्रवचनसरोजभास्कर (प्रभाचन्द्राचार्य)

आदिभाग:—

वीरं प्रवचनसारं निखिलार्थं निर्मलजनानन्दम् ।
वक्ष्ये सुखावबोधं निर्वाणपदं प्रणम्याप्तम् ॥१॥

श्रीकुन्दकुन्दाचार्यैः सकललोकोपकारकं मोक्षमार्गमध्ययनरुचिविनेया-

शयवशेनोपदर्शयितुकामो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्ट-देवताविशेषं शास्त्रस्यादौ नमस्कुर्वन्नाह—

अन्तभागः—

इति श्रीप्रभाचन्द्रदेवविरचिते प्रवचनसारसरोजभास्करे शुभोपयोगाधिकारः समाप्तः ॥

१३६. त्रैलोक्यदीपक (वामदेव)

आदिभागः—

वन्दे देवेन्द्रवृन्दार्च्यं नाभेयं जिनभास्करं ।
येन ज्ञानांशुभिर्नित्यं लोकालोकौ प्रकाशितौ ॥१॥
संस्तवीमि क्रमद्वन्द्वं शेषानां तु जिनेशिनाम् ।
यद् ज्ञानाम्भोधिमध्यस्थं त्रैलोक्यं पद्मसंन्निभम् ॥२॥
विदधातु मम प्रज्ञां जैनशास्त्रावबोधिनीम् ।
श्रीमज्जिनमुखाम्भोज-निर्गता श्रुतदेवता ॥३॥
सिद्धान्तवारिधेश्चन्द्रं नेमिचन्द्रं नमाम्यहं ।
यस्य प्रसादतो विश्वं हस्तस्थामलकोपमम् ॥४॥
विभाति विशदाकीर्तिर्यस्य त्रैलोक्यवर्तिनी ।
नमस्तस्मै मुनीन्द्राय श्रीमत्त्रैलोक्यकीर्तये ॥५॥
आकरः सर्वविद्यानां धर्म्ममार्ग-दिवाकरः ।
धर्म्माकर इति ख्यातः स मुनिः श्रूयते मया ॥६॥
वीर-इच्छ्यादिसेनस्य मिथ्यात्वाद्यरि संहृ (हृ ?) तौ ।
अतोऽसौ वीरसेनाख्यो जीयादागम-पारगः ॥७॥
पुरपाटवंश-भूषण-जोमन तनयस्य नेमिसेनस्य ।
अभ्यर्थनयाऽऽरब्धो ग्रंथोऽयं भव्यबोधाय ॥८॥
अथ पञ्चगुरून्नत्वा वक्ष्ये संस्कृतभाषया ।
त्रैलोक्यसारमालोक्य ग्रन्थं त्रैलोक्यदीपकम् ॥९॥

× × × ×

इतीन्द्रवामदेवविरचिते पुरवाटवंशविशेषकश्रीनेमिदेवस्य यशःप्रकाशके त्रैलोक्यदीपिके अधोलोकव्यावर्णनो नाम प्रथमोधिकारः ॥१॥

अन्तभागः—

जयति जित-मकरकेतुः केतुर्दुष्कर्मराशिदलनाय ।
श्रीमत्त्रिभुवनकीर्तिः कीर्तिलताक्रांतभुवनान्तः ॥६१॥
किं चन्द्रः किमु भास्करः किमथवा मेरुः किमंभोनिधिः ।
किं धात्री सुर वर्म्म किं किमथवा कल्पद्रुमः विश्रुतः ।
एकैकेल गुणेन विश्रुतपृथुप्रस्थायिनस्ते स्वयं ।
नैते शेषगुणाकरास्त्रिभुवने त्रैलोक्यकीर्तिः स्वयं ॥६२॥
अस्त्यत्र वंशः पुरवाडसंज्ञः समस्तपृथ्वीपतिमाननीयः ।
त्यक्त्वा स्वकीयां सुरलोकलक्ष्मीं देवा अपीच्छन्ति हि यत्र जन्म ।६३
तत्र प्रसिद्धोऽजनि कामदेवः पत्नी च तस्याजनि नामदेवी ।
पुत्रौ तयोर्जोमनलक्ष्मणाख्यौ बभूवतुः राघवलक्ष्मणाविव ॥६४॥
रत्नं रत्नखनेःशशी जलनिधे रात्मोद्भवः श्रीपते—
स्तद्वज्जोमनतो बभूव तनुजः श्री नेमिदेवाह्वयः ।
यो बाल्येऽपि महानुभावचरितः सज्जैनमार्गेरतः,
शांतः श्रीगुणभूषणक्रमनुतः सम्यक्त्वचूलांकितः ॥६५॥
यस्त्यागेन जिगाय कर्णनृपतिं न्यायेन वाचस्पतिं,
नैर्मल्येन निशापतिं नगपतिं सत्स्थैर्यभावेन च ।
गांभीर्येण सरित्पतिं मलततिं सद्धर्मसद्भावनात् ;
स श्रीसद्गुणभूषणोन्नतिमतो नेमिश्चिरं नन्दतु ॥६६॥
तत्सत्कार पुरस्कृतेन सततं तज्जैनतादर्शनात् ,
सन्तुष्टेन तदार्यवादिसुगुणै हृष्टेन पुष्टेन च ।
तस्य प्रार्थनया सुसंस्कृतवचो बन्धेन सन्निर्मितो,
ग्रन्थोऽयं त्रिजगत्स्वरूपकथनः सत्पुण्यनिर्मायणः ॥६७॥

वंशे नैगमसंज्ञके जनसुधी जैने प्रतिष्ठा विधा—
चार्यो जिनभक्तितत्परमना यो वामदेवाह्वयः।
तेनालोक्य समस्तमागमविधिं त्रैलोक्यदीपाभिधौ,
ग्रंथः साधुकृतो विशोध्य सुधियस्तन्वन्तु पृथ्वीतले ॥६८॥
वक्तृश्रोत्रनुमन्तॄणां विशदं जैनशासनम्।
भव्यानामर्हतां भूयात् प्रशस्तं सर्वमंगलम् ॥६९॥
यावन्मेरु सुधासिन्धु यावच्चन्द्रार्कमण्डलम्।
तावन्नित्यमहोद्योतैर्वर्धतां जैनशासनम् ॥७०॥

इतीन्द्र श्रीवामदेवविरचिते पुरवाडवंशविशेषकश्रीनेमिदेवस्य यशः प्रकाशके त्रैलोक्यदीपके ऊर्ध्वलोक व्यावर्णनोनाम तृतीयोधिकारः समाप्तः ॥

१४०. आदिपुराणटीका (ललितकीर्ति)

आदिभागः—

जिनाधीशं नत्वा तदनु जिनवाणीं च सुगुरुं,
करोमीत्थं टीकामहमिह पुराणस्य महतः।
द्वितीयार्द्धस्योच्चैः शरमितसुपर्वप्रमितिकाम्,
यथाशक्ति स्तोकांतनुमतिविशदां भक्तिवशतः ॥१॥

अन्तभागः—

शरदि शरभुजंगाहीलिका (१८८५) सत्प्रमायां,
जगति विदितमासे भाद्रके कृष्णपक्षे।
अकृत ललितकीर्तिदेवराट् (स) दशम्यां,
पुरुजिनवरराजः सत्पुराणस्य टीकाम् ॥१॥

१४१. वाग्भट्टालंकारावचूरि=कविचंद्रिका (वादिराज)

आदिभागः—

अनंतानंतसंसारपारगं पार्श्वमीश्वरं।
प्रमाण-नय-भंगाब्धिं भुक्तिभूयोप्सितं स्तुवे ॥१॥

वाग्भट्टकवींद्रं रचितालंकारस्यावचूरि[रि]यममला ।
जिन-वचन-गुरु-कृपातो विरच्यते वादिराजेन ॥२॥
धनंजयाऽऽशाधरवाग्भटानां धत्ते पदं संप्रति वादिराजः
खांडिल्यवंशोद्भवपोमसू नु जिनोक्तपीयूषसुतृप्तचित्तः ॥३॥

अन्तभागः—

संवत्सरेनिधिदृगश्वशशांकयुक्ते (१७२९) ।
दीपोत्सवाख्यदिवसे सगुरौ सचित्रे ।
लग्नेऽलिनामनि शुभे च गिरःप्रसादात् ,
सद्वादिराजरचिता कविचन्द्रिकेयं ॥१॥

श्रीराजसिंह नृपतिर्जयसिंह एव श्री तक्षकाख्यनगरी अणहिल्लतुल्या ।
श्रीवादिराज विबुधोऽपरवाग्भटोयं, श्रीसूत्रवृत्तिरिह नंदतु चार्कचन्द्रः ॥२॥

श्रीमद्भीमन्टपात्मजस्य बलिनः श्रीराजसिंहस्य मे,
सेवायामवकाशमाप्य विहिता टीका शिशूनां हितं ।
हीनाधिक्य वचोयदत्र लिखितं तद्व बुधैः क्षम्यताम्
गार्हस्थ्यावनिनाथ सेवनधिया कः स्वस्थतामाप्नुयात् ॥३॥

इति श्रीवाग्भट्टालंकारटीकायां पोमराजश्रेष्ठिसुतवादिराजविरचितायां कविचन्द्रिकायां पंचमः परिच्छेदः समाप्तः ॥

१४२. रामचरित्र (ब्रह्म जिनदास)

आदिभागः—

सुरेन्द्रमुकुटाश्लिष्टपादपद्मांशुकेशरम् ।
प्रणमामि महावीरं लोकत्रितयमंगलम् ॥१॥
सिद्धं सम्पूर्णभव्यार्थसिद्धे कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञान-चारित्र प्रतिपादनम् ॥२॥
मुनिसुव्रततीर्थेशं सुव्रतं वरचेष्टितम् ।
प्रणमामि सदा भक्त्या भव्यमंगलदायकम् ॥३॥

अन्तभागः—

श्रीमद्रामचरित्रमुत्तममिदं नानाकथापूरितं,
पापध्वान्तविनाशनैकतरणिं कारुण्यवल्लीवनं।
भव्यश्रेणिमनःप्रमोदसदनं भक्त्यानघं कीर्तितं,
नानासत्पुरुषालिवेष्टनयुतं पुण्यं शुभं पावनम् ॥१८०

श्रीवर्द्धमानेन जिनेश्वरेण त्रैलोक्यवंदेन यदुक्तमादौ।
ततःपरं गौतमसंज्ञकेन गणेश्वरेण प्रथितं जनानाम् ॥१८१
ततः क्रमाच्छ्री रविषेण नाम्नाऽऽचार्येण जैनागमकोविदेन।
सत्काव्यकेलीसदनेन पृथ्व्यां नीतं प्रसिद्धिं चरितं रघोश्च ॥१८२
श्री कुन्दकुन्दान्वयभूषणोऽथ बभूव विद्वान् किल पद्मनन्दी।
मुनीश्वरो वादिगजेन्द्रसिंहः प्रतापवान् भूवलये प्रसिद्धः ॥१८३
तत्पट्टपंकेजविकासभास्वान् बभूव निर्ग्रन्थवरः प्रतापी।
महाकवित्वादिकलाप्रवीणस्तपोनिधिः श्रीसकलादिकीर्तिः ॥१८४
पट्टे तदीये गुणवान् मनीषी क्षमानिधानं भुवनादिकीर्तिः।
जीयाच्चिरं भव्यसमूहवन्द्यो नानायतीव्रात निषेवणीयः ॥१८५
जगतिभुवनकीर्तिर्भूतलख्यातकीर्तिःश्रुतजलनिधिवेत्ताऽनंगमानप्रभेत्ता।
विमलगुणनिवासःछिन्नसंसारपाशःस जयतियतिराजःसाधुराजीसमाजः॥१८६
स ब्रह्मचारी गुरुपूर्वकोऽस्य भ्राता गुणज्ञोऽस्ति विशुद्धचित्तः।
जिनस्य दासो जिनदासनामा कामारिजेता विदितो धरित्र्यां ॥१८७
तेन प्रशस्तं चरितं पवित्रं रामस्य नीत्वा रविषेण सूरेः।
समुद्धृतं स्वान्यसुखप्रबोधहेतोश्चिरं नन्दतु भूमिपीठे ॥१८८
श्रीमज्जिनेश्वर-पदांबुजचंचरीकस्तच्छात्र सदगुरुषु भक्तिविधानदक्षः।
सार्थाभिधोऽसौ जिनदास नामा दयानिवासो भुवि राजते च ॥१८९
न ख्याति-पूजाद्यभिमानलोभाद् ग्रन्थः कृतोऽयं प्रतिबोधहेतोः।
निजान्ययोः किन्तु हिताय चापि परोपकाराय जिनागमोऽङ्गः ॥१९०
जिनप्रसादादिदमेव याचे दुःखक्षयं शाश्वतसौख्यहेतोः।
कर्मक्षयं बोधचरित्रलाभं शुभांगतिं चेह न चान्यदेव ॥१९१

यत्किंचिदत्रस्वरसन्धिजातं पदादिकं [वा] चलितं प्रमादात् ।
क्षमस्व तद्भारति ! तुच्छबुद्धेर्ममाशु नो मुह्यति कः श्रुताब्धौ ॥११२
तथा च धीमद्भिरिदं विशोध्यं मुनीश्वरैर्निर्मलचित्तयुक्तैः ।
कृत्वानुकंपा मयि जैनशास्त्र (स्त्रे) विशारदैः सर्वकषायमुक्तैः ॥११३
यावन्महीमेरुनगः पृथिव्यां शशी च सूर्यः परमाणवश्च ।
श्रीमज्जिनेन्द्रस्य गिरश्च तावन्नन्दत्विदं रामचरित्रमार्यम् ॥११४

रक्षां संघस्य कुर्वन्तु जिनशासनदेवताः ।
पालयंतोऽखिलं लोकं भव्यसज्जनवत्सलः ॥११५

इति श्रीरामचरित्रे भट्टारक-सकलकीर्तिशिष्यब्रह्मजिनदासविरचिते बलदेव निर्वाणकथनो नाम त्र्यशीतितमः सर्गः ॥८३

१४३. ज्येष्टजिनव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

ज्येष्टं जिनं प्रणम्यादावकलंककलध्वनिं ।
श्रीविद्यादिनंदिनं ज्येष्टजिनव्रतमथोच्यते ॥१॥

अन्तभागः—

आसीदसीममहिमा मुनि पद्मनन्दी देवेन्द्रकीर्ति गुरुरस्य पदेशदेकः (?) ।
तत्पट्टविष्णुपदपूर्णशशांकमूर्तिर्विद्यादिनंदिगुरुरत्रपवित्रचित्तः ॥७६॥

गुणरत्नभृतो वचोऽमृताब्धः स्याद्वादोर्मिसहस्रशोभितात्मा ।
श्रुतसागर इत्यमुख्यशिष्यः स्वाख्यानं रचयांचकार सूरिः ॥७७॥

अग्रोत्कान्वयशिरोमुकटायमानः संघाधिनाथ विमलूरिति पुण्यमूर्तिः ।
भार्यास्य धर्ममहती वृद्धतीति नाम्ना सासूत सूनुमनवद्य महेन्द्रदत्तं ॥७८॥
वैराग्यभावितमनाः जिनूलह (?) दिष्टः श्रीमूलसंघगुणरत्नविभूषणोऽभूत् ।
देशव्रतिष्वतितरां व्रतशोभितात्मा संसारसौख्यविमुखः सुतपोनिधिर्वा ॥७९॥
पुत्रोस्य लक्ष्मणइति प्रणतीगुरूणां कुर्वंश्चकास्ति विदुषांधुरि वर्णनीयः ।
अभ्यर्थकारितमिदं श्रुतसागराख्यमाख्यानकं चिरतरं शुभदं समस्तु ॥८०॥

इतिप्रबंधपंडिताग्रणीसूरिश्रीश्रुतसागरविरचितं ज्येष्ठजिनवरव्रतोपाख्यानं समाप्तम् ॥१॥

१४४. रविव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

प्रणम्य शिरसार्हन्तं सिद्धांस्त्रैलोक्यमंगलान् ।
मुनींस्तद्धर्मवाग्देव्यौ रविव्रतमहं ब्रुवे ॥१॥

अन्तभागः—

सरस्वतीगच्छ-सुरद्रुमावलीवल्लीढभूसेचनधीघनाघनः ।
चिरं च देवेन्द्रयशा मुनिर्मम प्रकामकामाग्निशमं प्रयच्छतु ॥६१॥
भट्टारकघटामध्ये यत्प्रतापो विराजते ।
तारास्विव रवेः श्रीदो विद्यानंदीश्वरोऽस्तु मे ॥६२॥
प्रमाण-लक्षणच्छंदोऽलंकारमणिमंडितः ।
पंडितस्तस्य शिष्योऽयं श्रुतरत्नाकराभिधः ॥६३॥
गुरोरनुज्ञामधिगम्य धीधनश्चकार संसारसमुद्रतारकः (कम्) ।
स पार्श्वनाथव्रतसत्कथानकं सतां नितांतं श्रुतसागरः श्रिये ॥६४॥

इति रविव्रतकथा समाप्ता ।

१४५. सप्तपरमस्थानव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

विद्यानंद्यकलंकार्यं पूज्यपादं जिनेश्वरम् ।
नत्वा ब्रवीम्यहं सप्तपरमस्थानसद्व्रतम् ॥१॥

अन्तभागः—

व्रतरतिरकलंकः पूज्यपादो मुनीनां, गुणनिधिरबुधानां बोधिकृत्पद्मनन्दी ।
जयति महितकांतिः क्षेमकृद्दिव्यमूर्तिर्मदनमदविदारी देवदेवेंद्रकीर्तिः ॥६२॥
सद्भट्टारक" (?) वर्णनीयश्चेतो यतीनामभिवंदनीयः ।
विद्यादिनंदी गणभृत्तदीयः सम्यग्जयत्येष गुरुर्मदीयः ॥६३॥
मया तदादेशवशेन धीमतां प्रकाशितेयं महतां बृहत्कथा ।

पिबन्तु तां कर्णसुधां बुधोत्तमा महानुभावाः श्रुतसागराश्रिताः ॥६४॥
विरुद्धमागमात्किंचिद्वचो यदि च भाषितम् ।
तन्मे सरस्वती संतु मनते (मानिते) मातरर्हसि ॥६५॥

इति सप्तपरमस्थानकथा सम्पूर्णा ।

१४६. मुकुटसप्तमीकथा (ब्रह्मश्रुतसागर)

आदिभागः—

श्रीशारदास्पदीभूत-पादद्वितयपंकजम् ।
नत्वाऽर्हन्तं प्रवक्ष्यामि व्रतं मुकुटसप्तमी ॥१॥

अन्तभागः—

श्रीमल्लिभूषणगुरोः प्रकटोपदेशाच्चक्रे कथानकमिदं श्रुतसागरेण ।
देशव्रतेन कृतिनां सुकृतैकहेतुः शं वस्तनोत्विह परत्र भवे च नित्यम् ॥६१॥

इति मुकुटसप्तमीकथा समाप्ता ।

१४७. अक्षयनिधिव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

पूज्यपादाऽकलंकार्यविद्यानंदींद्रवंदितम् ।
प्रणम्य तीर्थकृद्देवं वक्ष्येऽक्षयनिधिव्रतम् ॥१॥

अन्तभागः—

गच्छे श्रीमन्मूलसंघतिलके सारस्वते विश्रुते,
विद्वन्मान्यतम-प्रसह्य-सुगणे स्वर्गापवर्गप्रदे ।
विद्यानंदिगुरुर्बभूव भविकानंदी सतां सम्मत-
स्तत्पट्टे मुनिमल्लिभूषणगुरुर्भट्टारको नंदतु ॥८७॥
तर्कव्याकरणप्रवीणमतिना तस्योपदेशाहित-
स्वांतेन श्रुतसागरेण यतिना तेनाऽमुना निर्मितम् ।
श्रेयोधामनिकाममक्षयनिधिं स्वेष्टव्रतं धीमतां,
कल्याणप्रदमस्तु शास्त्रमितिनस्तत्तद्विदां संमुदे ॥८८॥

इत्यक्षयनिधिविधानकथानकं समाप्तम् ।

१४८. षोडशकारणकथा (ब्रह्मश्रुतसागर)

आदिभागः—

अथप्रणम्यतीर्थेशं तीर्थेशपदलब्धये ।
श्रीविद्यानंदिनं साधुं ब्रुवे षोडशकारणम् ॥१॥

अन्तभागः—

श्रीमूलसंघे विबुधप्रपूज्ये श्रीकुंदकुंदान्वय उत्तमेऽस्मिन् ।
विद्यादिनंदी भगवान् बभूव स्वबृत्तसारश्रुतपारमाप्तः ॥६७॥
तत्पादभक्तः श्रुतसागराख्यो देशव्रती संयमिनां वरेण्यः ।
कल्याणकीर्त्तेर्मुहुराग्रहेण कथामिमां चारु चकार सिद्धयै ॥६८॥
इति षोडशकारणोपाख्यानं समाप्तम् ।

१४९. मेघमालाव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

समंताद्भद्रमर्हंतं नत्वा विद्यादिनंदिनम् ।
मेघमालाव्रतं मेघमालाशांत्यर्थमुच्यते ॥१॥

अन्तभागः—

सत्यं वाचि, हृदि स्मरत्रयमतिर्मोक्षाभिलाषोऽन्तरे,
श्रोत्रं साधुजनोक्तिषु प्रतिदिनं सर्वोपकारः करे ।
यस्यानंदनिधेर्बभूव स विभुर्विद्यादिनन्दी मुनिः,
संसेव्यः श्रुतसागरेण विदुषा भूयात्सतां संपदे ॥२१॥
इति मेघमालाव्रतोपाख्यानं समाप्तम् ।

१५०. चन्दनषष्ठीकथा (ब्रह्मश्रुतसागर)

आदिभागः—

प्रभाचन्द्रं पूज्यपादं श्रीविद्यानन्दिनं जिनम् ।
समन्तभद्रं संस्मृत्य वक्ष्ये चन्दनषष्ठिकाम् ॥१॥

अन्तभाग:—

स्वस्ति श्रीमूलसंघेऽभवदमरनुतः पद्मनंदी मुनीन्द्रः
शिष्यो देवेन्द्रकीर्तिर्लसदमलतया भूरिभट्टारकेज्यः ।
श्रीविद्यानंदिदेवस्तदनुमनुजराजार्च्यर्यत्पद्मयुग्म-
स्तच्छिष्येणारचीदं श्रुतजलनिधिना शास्त्रमानन्दहेतु ॥१६॥
स्वल्पमपि शास्त्रमेतच्छब्दार्थविचित्रभावरचिततया ।
उद्वृत्तलद्रवमहाब्धेर्मलमंतर्जातमपनयति ॥१७॥

इति श्रीब्रह्मश्रुतसागरविरचिता चन्दनषष्ठीकथा समाप्ता ।

१५१. लब्धिविधानकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

श्रीविद्यानंदिनं पूज्यपादं नत्वा जिनेश्वरम् ।
कथां लब्धिविधानस्य वच्म्यहं सिद्धिलब्धये ॥१॥

अन्तभाग:—

जयति गुणसमुद्रो वीरनाथो जिनेन्द्रस्तदनु जयति धीमान् गौतमः सूरिवर्यः ।
जयति जगति विद्यानंदिदेवो मुनीन्द्रः श्रुतपदसमुपेतःसागरस्तस्य शिष्यः॥२५

तेनेदं चरितं विचित्ररचनं चेतश्चमत्कारकं,
सर्वव्याधिविनाशिनं गुणाकरं श्रीगौतमस्योत्तमम् ।
चक्रे शक्रपुरस्सरैर्म्मान्यं (रतिमहामान्यैः) सदा सम्पदां
वेश्मश्री श्रुतसागराश्रितवतां देयात्सतां मंगलम् ॥२६॥

इतिब्रह्मश्रीश्रुतसागरविरचितं लब्धिविधानोपाख्यानं समाप्तम् ।

१५२. पुरंदरविधानकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

उमास्वामिनमर्हन्तं शिवकोटिं महामुनिम् ।
विद्यानंदिगुरुं नत्वा पुरंदरविधिं ब्रुवे ॥१॥

अन्तभागः—

आनन्दादकलंकदेवचरणाम्भोजालिना दीक्षितो
विद्यानंदिमहात्मनां श्रुततपोमूर्तिः परार्थे रतः।
साधूनां श्रुतसागरः प्रियतमः कल्याणकीर्त्याग्रहा-
च्चक्रे चारुपुरंदरव्रतविधिं सिद्ध्यंगना-लालसः ॥६३॥

इति पुरंदरविधानोपाख्यानं समाप्तम्।

१५३. दशलाक्षणीव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

अर्हंतं भारतीं विद्यानंदिसद्गुरुपंकजम्।
प्रणम्य विनयाद्वक्ष्ये दशलाक्षणिकं व्रतम् ॥१॥

अन्तभागः—

जातः श्रीमति मूलसंघतिलके श्रीकुंदकुंदान्वये,
विद्यानंदिगुरुर्गरिष्ठमहिमा भव्यात्मसंबुद्धये।
तच्छिष्यश्रुतसागरेण रचितं कल्याणकीर्त्याग्रहे
शं देयाद्दशलक्षणव्रतमिदं भूयाच्च सत्संपदे ॥६६॥

इति श्रीदशलाक्षणिकव्रतकथा समाप्ता।

१५४. पुष्पांजलिव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

कवीन्द्रमकलंकाख्यं विद्यानन्दं जिनेश्वरम्!
पूज्यपादं प्रणम्यादौ वक्ष्ये पुष्पांजलिव्रतम् ॥१॥

अन्तभागः —

स्वस्ति श्रीमति मूलसंघतिलके गच्छे गिमूर्च्छ (मुमुक्षु) च्छिवे,
भारत्याः परमार्थपंडितनुतो विद्यादिनन्दी गुरुः।
तत्पादाम्बुजयुग्ममत्तमधुलिट् चक्रे नवकाशयः,
सद्बोधः श्रुतसागरः शुभमुपाख्यानं स्तुतस्तार्किकैः ॥१०१॥

इति पुष्पांजलिव्रतकथा समाप्ता।

१५५. आकाशपंचमीकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

सुतं नाभेर्यशस्वत्याः पतिं भरतसद्गुरुम् ।
आकाशपंचमीं वक्ष्ये नत्वा लोकत्रयप्रभुम् ॥१॥

अन्तभागः—

वाचां लीलावतीनां निधिरमलतपाः संयमोद्न्वदिन्दुः,
श्रीविद्यानन्दिसूरिर्जयतु जगति नाकौकसां पूज्यपादः ।
रंगद्गङ्गातरंगैस्त्रिभुवनपथगास्पर्द्धिनी यस्य कीर्ति—
र्भूयाद्भूयः शिवाय प्रगुणगुणमणीनां सतां रोहणाद्रिः ॥१०३॥
तस्य श्रीश्रुतसागरेण विदुषां वर्येण सौंदर्यंवं—
च्छिष्येणारचि सत्कथानकमिदं पीयूषवर्षोपमम्,
सम्तश्चातकवत्पिबंतु जगतामेनोनिदाघः क्षयं
भव्यानां वितरंतु पंचगुरवश्चेतोमुदं संपदम् ॥१०४॥

इत्याकाशपञ्चमीव्रतकथा समाप्ता ।

१५६. मुक्तावलीव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

प्रभाचन्द्राऽकलंकेष्वविद्यानन्दीक्षितक्रमाम् ।
जीवन्मुक्तावलीं नत्वा वक्ष्ये मुक्तावलीव्रतम ॥१॥

अन्तभाग :—

ग्रन्थं ग्रन्थिचयं विघट्य घटनामुद्भाव्य निर्दूषणाम्,
यः सम्बोधयते स्म भव्यनिवहं श्रीमूलसंघेऽनघे ।
श्रीदेवेन्द्रयशास्तदुन्नतपदे निस्तारको वीरव—
द्विद्यानंदिमुनीश्वरो विजयते चारित्ररत्नाकरः ॥७७॥
तत्पादाम्बुजर्चितनामृतभृतः सर्वज्ञचन्द्रोदये,
रङ्गद्भङ्गतरङ्गशोभितमहीरङ्गो विशुद्धाशयः ।

औदार्यादिगुणौघरत्नवसतिर्विद्याविनोदस्थिति—
स्तच्छिष्यः श्रुतसागरो विजयतां मुक्तावलीकृद्यतिः ॥७८॥
जातो हूंबडवंशमण्डनमणिः श्रीगोपियाख्यः कृती,
कांता शीरिति तस्य सद्गुरुमुखोद्भूतेश्च कल्याणकृत् ।
पुत्रोऽस्यां मतिसागरो मुनिरभूद्भव्यौघसम्बोधकः,
सोऽयं कारयति स्म निर्मलतपाः शास्त्रं चिरं नन्दतु ॥७८॥

इति श्रीमुक्तावलीविधानकथानकं समाप्तम्

१५७. निर्दुःखसप्तमीकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

विद्यानंदं प्रभाचंद्र पूज्यपादं जिनेश्वरम् ।
नत्वाऽकलंकं वक्ष्मि कथां निर्दुःखसप्तमीम् ॥

अन्तभाग :—

सकलभुवनभास्वद्भूषणं भव्यसेव्यः
समजनि कृतिविद्यानंदिनामा मुनीन्द्रः ।
श्रुतसमुपपदाद्यः सागरस्तस्य सिद्धयै,
शुचिविधिमिममेष द्योतयामास शिष्यः ॥४३॥

इति निर्दुःखसप्तमीविधानोपाख्यानं समाप्तम् ।

१५८. सुगन्धदशमीकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

पादाम्भोजानहं नत्वा श्रीमतां परमेष्ठिनाम् ।
शृण्वन्तु साधवो वक्ष्ये सुगन्धदशमीकथाम् ॥१॥

अन्तभाग :—

कृतिरितियतिविद्यानंदिदेवोपदेशाज्जिनविधुवरभक्तेर्वर्णिनस्तु श्रुताब्धेः ।
विबुधहृदयमुक्तामालिकेव प्रणीता सुकृतधनसमर्घ्या गृह्णतां तां विनीताः ॥६१॥
इति श्रीवर्णिना श्रुतसागरेण विरचिता सुगंधदशमीकथा समाप्ता ।

१५९. श्रवणद्वादशीकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

पूज्यपाद-प्रभाचन्द्राऽकलंकमुनिमानितम्।
नत्वाऽर्हन्तं प्रवक्ष्यामि श्रवणद्वादशीविधिम् ॥१॥

अन्तभाग :—

विद्यानन्दिमुनींद्रचन्द्रचरणांभोजातपुष्पंधयः
शब्दज्ञः श्रुतसागरो यतिवरोऽसौ चारु चक्रे कथाम्।
श्रुत्वा पापकलंकपंकविलसन्मन्दाकिनीमुत्तमां
संतः सारसुखाय धर्मतृषिताः कुर्वन्तु पुण्यात्मनाम् ॥४०॥

इतिश्रवणद्वादशी-उपाख्यानं समाप्तम्।

१६०. रत्नत्रयकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

विद्यानन्दप्रदं पूज्यपादं नत्वा जिनेश्वरम्
कथां रत्नत्रयस्याहं वक्ष्ये श्रेयोनिधेः सताम् ॥१॥

सर्वज्ञसारगुणरत्नविभूषणोऽसौ विद्यादिनंदिगुरुरुच्चतरप्रसिद्धः।
शिष्येण तस्य विदुषा श्रुतसागरेण रत्नत्रयस्य सुकथा कथितात्मसिद्ध्यै ॥८३॥

इति श्रीरत्नत्रयविधानकथानकं समाप्तम्।

१६१. अनन्तव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

प्रणम्य परमात्मानमनंतं परमेष्ठिनम्।
विद्यानंदं प्रवक्ष्येऽहमनंतव्रतसत्कथाम् ॥१॥

अन्तभाग:—

सूरिर्देवेन्द्रकीर्तिर्विबुधजननुतस्तस्य पट्टाब्धिचंद्रो
रुंद्रो विद्यादिनंदी गुरुरमलतपा भूरिभव्याब्जभानुः।
तत्पादांभोजभृंगः कमलदलसल्लोचनश्चंद्रवक्त्रः

कर्तामुष्यनन्तव्रतस्य श्रुतसमुपपदः सागरः शं क्रियाद्गः ॥४७॥

इत्यनंतव्रतकथा ब्रह्मश्रीश्रुतसागरविरचिता सम्पूर्णा ।

१६२. अशोकरोहिणीकथा (ब्रह्मश्रुतसागर)

आदिभागः—

नत्वा पंचगुरून् विद्यानंदस्वात्मसपदम् ।
अशोकरोहिणीवृत्तं सिद्धये कथयाम्यहम् ॥१॥

अन्तभागः—

गच्छे श्रीमति मूलसंघतिलके सारस्वते निर्मले
तत्त्वज्ञाननिधिर्बभूव सुकृती विद्यादिनन्दी गुरुः ।
तच्छिष्यश्रुतसागरेण रचिता संक्षेपतः सत्कथा
रोहिण्याः श्रवणामृतं भवतु वस्तापच्छिदे संततम् ॥६६॥

इतिश्रीश्रुतसागरविरचिता अशोकरोहिणीकथा समाप्ता ।

१६३. तपोलक्षणपंक्तिकथा (ब्रह्मश्रुतसागर)

आदिभागः—

विद्यानन्दं प्रभाचन्द्रमकलंकं जिनाधिपम् ।
प्रणम्य शिरसा वक्ष्ये तपोलक्षणपंक्तिकम् ॥१॥

अन्तभागः—

देवेन्द्रकीर्तिगुरुपट्टसमुद्रचंद्रो विद्यादिनंदिसुदिगम्बर उत्तमश्रीः ।
तत्पादपद्ममधुपः श्रुतसागरोऽयं ब्रह्मव्रती तप इदं प्रकटीचकार ॥४२॥

इतिब्रह्मश्रीश्रुतसागरविरचिता लक्षणपंक्तितपःकथा समाप्ता ।

१६४. मेरुपंक्तिकथा (ब्रह्मश्रुतसागर)

आदिभागः—

चिंतयित्वा चिरं वीरं धीरं गम्भीरशासनम् ।
विद्यानंदप्रदं मेरुपंक्तिमुद्योतयाम्यहम् ॥१॥

अन्तभागः—

सोनाख्युद्यसखी कदाग्रविमुखी शुभ्रांशुशुंभन्मुखी
पूजादानमुनीन्द्रमानविनयस्वाध्यायसाधुद्युतिः ।
विद्यानंद्यकलंकदेवकलिते मार्गे रतिं बिभ्रती
श्रीमान् कांकसुतात्रकीर्तितभुजा ढोसी चिरं जीवतु ॥४६॥

इतिश्रीश्रुतसागरविरचितं मेरुपंक्त्युपाख्यानं समाप्तम् ।

१६५. विमानपंक्तिकथा (ब्रह्मश्रुतसागर)

आदिभागः—

पूज्यपादाऽकलंऽऽकार्य-विद्यानंदिस्तुतक्रमम् ।
विमानपंक्तिमावच्मि तपो नत्वा जिनेश्वरम् ॥१॥

अन्तभागः—

सद्ग्वाक्यमलंघ्यमित्यपि मनस्यारोप्य विद्वद्वरो
वर्णि-श्रीश्रुतसागरो जिनपतेर्द्धर्मानुरागादरः ।
गोमत्याहतवाक्यबोधनपरश्चक्रे नवकाशयः
सम्यग्दष्टिचकोरचंद्रवदनः शास्त्रं चिरं नंदतु ॥८८॥

इति भट्टारकश्रीविद्यानंदिप्रियशिष्य सूरि(वर्णि)श्रीश्रुतसागरविरचिता विमानपंक्त्युपाख्यानकथा समाप्ता ।

१६६. पल्यविधानकथा (ब्रह्मश्रतसागर)

आदिभागः—

श्रीविद्यानंदिपादाब्जं हृदि ध्यात्वोन्नतिप्रदम् ।
सूत्रानुसारतः पल्यविधानं रचयाम्यहम् ॥१॥

अन्तभागः—

श्रीमूलसंघपरमार्हतभव्यपद्मसंबोधवाक्यकिरणः प्रगुणप्रतापः ।
देवेन्द्रकीर्तिरभवद्भुवनैकभानुर्गच्छे गिर. सुरनरोरगपूजितेऽस्मिन् ॥४०॥
तत्पट्टवारिधिसमुल्लसनैकचंद्रः सांद्रद्युतिः परमखंडसमुद्यवृत्तः ।
निर्लांछनो बुधजनैरभिपूज्यपादो विद्यादिनंदिगुरुरत्र चिरं विरेजे ॥४१॥

तत्पादपंकजरजोरचितोत्तमांगः श्रीमल्लिभूषणगुरुर्विदुषां वरेण्यः ।
भट्टारको भुवनभव्यसरोजसूर्यो मिथ्यातमोविघटने पटुरेष भाति ॥४२॥

सर्वज्ञशासनमहामणिमंडितेन तस्योपदेशवशिना श्रुतसागरेण ।
देशव्रतिप्रभुतरेण कथेयमुक्ता सिद्धिं ददातु गुरुभक्तिविभावितेभ्यः ॥४३॥

श्रीभानुभूपतिभुजाऽसिजलप्रवाहनिमग्नशत्रुकुलजाततत: प्रभावः ।
सद्‌वृद्धहुंबडकुले बृहतीलदुर्गे श्रीभोजराज इति मंत्रिवरो बभूव ॥४४॥

भार्यास्य सा विनयदेव्यभिधा सुधोपसोद्‌गारवाक् कमलकांतमुखी सखीव ।
लक्ष्म्याः प्रभोर्जिनवरस्य पदाब्जभृंगी साध्वी पतिव्रतगुणा मणिवन्महार्घ्या ॥४५

साऽसूत भूरिगुणरत्नविभूषितांगं श्रीकर्म्मसिंहमितिपुत्रमनूकरत्नम् ।
कालं च शत्रु-कुल-कालमनूनपुण्यं श्रीघोषरंघनतराघगिरींद्रवज्रम् ॥४६॥

गंगाजलप्रविमलोच्चमनोनिकेतं तुर्यं च वर्यंतरमंगजमत्र गंगम् ।
जाता पुरस्तदनु पुत्तलिका स्वसैषां वक्त्रेषु सज्जिनवरस्य सरस्वतीव ॥४७॥

सम्यक्त्वदाढ्यकलिता किल रेवतीव सीतेव शीलसलिलोक्षितभूरिभूमिः ।
राजीमतीव सुभगागुणरत्नराशिर्वेलासरस्वतिइवांचति पुत्तलीह ॥४८॥

यात्रां चकार गजपंथगिरौ ससंघा ह्येतत्तपोविदधती सुदृढव्रता सा ।
सच्छांतिकं गणसमर्चनमर्हदीशं नित्यार्चनं सकलसंघसदत्तदानम् ॥४९॥

तुंगीगिरौ च बलभद्रमुनेः पदाब्जभृंगी तथैव सुकृतं यतिभिश्चकार ।
श्रीमल्लिभूषणगुरुप्रवरोपदेशाच्छास्त्रं व्यधाय यदिदं कृतिनां हृदिष्टम् ॥५०॥

मातेव व्रतिनां गुणान् विदधती संश्रृण्वती चागमं
पूजादानपरा परोपकृतिकृद्दृश्यैव चनन्यक्षतः (?) ।
स्त्री चैषांगवशेन मानसहवा निर्व्यूढचारुव्रता
दीर्घायुर्बलभद्रदेवहृदया भूयात्पदं संपदः ॥२५१॥

इतिभट्टारकश्रीमल्लिभूषणगुरूपदेशात्सूरिश्रुतसागरविरचिता पल्यविधानव्रतोपाख्यानकथा समाप्ता ।

१६७. छन्दोनुशासनवृत्तिः (कवि वाग्भट)

आदिभागः—

प्रणिपत्य प्रभुं नाभिसंभवं भक्तिनिर्भरः।
विवृणोमि स्वयमहं निजं छंदोनुशासनम् ॥१॥

ग्रंथारंभे शिष्टसमयप्रतिपालनाय अभिधेय-सम्बन्ध-प्रयोजनप्रतिपादनाय च ग्रंथकार इष्टाधिकृतदेवतानमस्कारपूर्वकमुपक्रमते। तद्यथा—

विभुं नाभेयमानम्य छंदसामनुशासनम्।
श्रीमन्नेमिकुमारस्यात्मजोहं वच्मि वाग्भटः ॥२॥

(१) संज्ञाध्याय (२) समवृत्ताख्य

पुरुषोत्तमराहडप्रभो ! कस्य नहि प्रमदं ददाति सद्यः।
वितता तव चैत्यपद्धतिर्वातिचलध्वजमालधारिणी ॥१३॥

(३) अर्धसमवृत्ताख्य (४) मात्रासमक × × × (५) मात्राच्छंद।

अन्तभागः—

इति महाकविश्रीवाग्भटविरचितायां वाग्भटाभिधानछंदोवृत्तौ मात्राच्छंदोऽध्यायः पंचमः।

नव्यानेकमहाप्रबन्धरचनाचातुर्यविस्फूर्जित—
स्फारोदारयशः प्रचारसततव्याकीर्णविश्वत्रयः।
श्रीमन्नेमिकुमारसूनुरखिलप्रज्ञालुचूडामणि—
श्छंदः शास्त्रमिदं चकार सुधियामानंदकृद् वाग्भटः ॥
संपूर्णंचेदं श्रीवाग्भटकृतं छंदोनुशासनमिति ॥

—(पाटन भंडारप्रति)

१६८. षण्णवतिक्षेत्रपालपूजा (विश्वसेनमुनि)

आदिभागः—

वंदेऽहं सन्मतिं देवं, सन्मतिं मतिदायकम्।
क्षेत्रपालविधिं वक्ष्ये भव्यानां विघ्नहानये ॥१॥

अन्तभागः--

श्रीमच्छ्रीकाष्ठसंघे यतिपतितिलके रामसेनस्य वंशे
गच्छे नंदीतटाख्ये यगदितिह (यमततिसुमुखे)ऽतुच्छकर्मा मुनीन्द्रः ।
ख्यातोऽसौ विश्वसेनो विमलतरमतिर्येन यज्ञं चकार्षीव्
सोप्पेसुग्रामवासे भविजनकलिते क्षेत्रपानां शिवाय ॥२७॥

इति श्रीविश्वसेनकृता षण्णवतिक्षेत्रपालपूजा संपूर्णा ।

१६६. वैद्यकशास्त्र (हरिपाल)

आदिभागः—

णमिऊण जिणो विज्जो भवभमणेवाहिफेदणसमत्थो ।
पुण विज्जयं पयासमि जं भणियं पुव्वसूरीहिं ॥१॥

गाहाबंधे विरयमि देहिणं रोय-णासणं परमं ।
हरिवालो जं वुल्लइ तं सिज्झइ गुरुपसाएण ॥२॥

(इसके बाद 'वाडव-गरु-जावित्ती' इत्यादि रूपसे शिरोवर्तिदोष नाशन-की चिकित्सा-दवाई लिखी है आगे शिरोरोगकी दवाइयां हैं । इस तरह प्रयोग दिये हैं ।)

अन्तभागः—

हरडइ वातिं समंजलि तेण सुणीरेण पक्खालिज्जा ।
लिंगे वाहिं पसामइ भासिज्जइ जोयसारेहिं ॥२५५॥

हरिवालेण य रइयं पुव्वविज्जेहिं जं जि णिद्दिट्ठं ।
बुहयण तं मट्ठु खमियहु हीणहियं जं जि कव्वो य ॥२५६॥

विक्कम-णरवइ-काले तेरसयागयाइं एयाले (१३४१) ।
सिय-पोसट्ठमि मंदे विज्जयसत्थो य पुण्णो य ॥

इति परा(प्रा)कृतवैद्यक [शास्त्र] समाप्तम् ॥

१७०. बृहत्सिद्धचक्रपूजा (बुध वीरु)

आदिभागः—

अनन्तानन्तसौख्याढ्यं सिद्धचक्रं प्रणम्य वै ।
श्रीवृहत्सिद्धचक्रस्य विधिं वक्ष्ये विधानतः ॥१॥

अन्तभाग :—

वेदाष्टबाणशशि-संवत्सरविक्रमनृपाद्गहमाने ।
रुहितासनाम्नि नगरे बब्बर-मुगलाधिराज-सद्राज्ये ॥१॥
श्रीपार्श्वचैत्यगेहे काष्ठासंघे च माथुरान्वयके ।
पुष्करगणे बभूव भट्टारकमणिकमलकीर्त्याह्वः ॥२॥
तत्पट्टकुमुदचन्द्रो मुनिपतिशुभचन्द्रनामधेयोऽभूत् ।
तत्पट्टाब्जविकासी यतिराट् यशसेन इति कथितः ॥३॥
तच्छिष्यणीह जाता सच्छील-तरंगिणी महाव्रतिनी ।
राजश्रीरिति नाम्नी संयमनिलया विराजते जगति ॥४॥
तद्भ्राता मुनिदाने श्रेयोनृप इति विभासते सुतराम् ।
श्रीनयणसीह नाम्ना पद्मावतिपुरवाल इति भाति ॥५॥
तत्पुत्रः सुपवित्रो विद्याविनयाम्बुधिः सुधी धीरः ।
जिनदासनामधेयो विद्वज्जनमान्यतां प्राप्तः ॥६॥
अग्रोतवंशजातस्तोतूसाधोस्तनूद्भवो मतिमान् ।
मुनिहेमचन्द्रशिष्यो वीरु नामा बुधश्चास्ते ॥७॥
बुधजिनदास-निदेशात् वीरुबुधश्चित्रबुद्धि-विभवेन ।
श्रीसिद्धचक्रयंत्रं, हब्ध्वा पाठं व्यरीरचत्सुगमम् ॥८॥
यः पठति लिखति पूजां करोति कारयति सिद्धचक्रस्य ।
सुर-मनुज-सुखं भुक्त्वा स याति मोक्षं भवैः कतिभिः ॥९॥
यावत्सुमेरु-कुलगिरि-क्षीरोदधि-धरणि-सुरनदीपूरं ।
तावत्सुसिद्धपूजा पाठावेतौ प्रवर्तयताम् ॥१०॥

शुद्धज्ञानमया जरादिरहिताः सिद्धा भवन्तु श्रियै
भव्यानां सुखकारिणो जिनवराः सन्तुक्षितौ भूभुजाम् ॥
आचार्या वितरन्तु मंगलविधिं सर्वप्रदानां सदा
सम्यक्साधुपदाधिरूढपतयः प्रीणंतु सङ्घं चिरम् ॥११॥

इतिबुधवीरुविरचित-पद्मावतिपुरवालपण्डितश्रीजिनदासनामाङ्कितवृहत्सिद्धचक्रपूजा समाप्ता ।

१७१. यशोधरचरित्र (भ० ज्ञानकीर्ति)

आदिभागः—

श्रीमन्नाभिसुतो जीयाज्जिनो विजितदुर्नयः ।
मङ्गलार्थं नतो वस्तु (वोऽस्तु) सर्वदा मंगलप्रदः ॥१॥

नमामि देवं मुनिसुव्रताख्यं, मुनिव्रतैर्भूषितभव्यदेहम् ।
सुरेन्द्रराजेन्द्रकिरीटकोटि रत्नप्रभालीढपदारविन्दम् ॥२॥

श्रीवर्द्धमानं प्रणमामि नित्यं, श्रीवर्द्धमानं मुनिवृन्दवन्द्यम् ।
धर्माम्बुवर्षैः परिपुष्टनीतिं भव्यासुभृत्शस्यसमूहमीशम् ॥३॥

शेषान् जिनान् धर्मसुतीर्थनाथान् वंदे सदा मंगलदानदक्षान् ।
कैवल्यदीपेन विलोकितार्थान् विभून् विमुक्तेः पथसार्थवाहान् ॥४॥

सर्वज्ञवक्त्राब्जविनिर्गतां तां जैनेश्वरीं वाचमहं स्तवीमि ।
सदंगपूर्वादिस्वरूपगात्रीमज्ञानदुर्भ्रान्तरविप्रकाशाम् ॥५॥

श्रीगौतमादेर्गणपस्य पादान् स्तुवे सदाऽहं दृढभक्तिचित्तः ।
नमन्मुनिवृन्दनिवन्द्यमानानपारजन्माम्बुधिपोततुल्यान् ॥६॥

उमादिकस्वातिमशेषतत्त्वं सूत्रार्थकारं कविसृष्टिकारं ।
प्रत्येकबुद्धाख्यगणेशकीर्तिं स्वान्तां प्रकुर्वन्तमुपैमि भक्त्या ॥७॥

समंतभद्रं कविराजमेकं वादीभसिंहं वरपूज्यपादम् ।
भट्टाकलंकं जित-बौद्धवादं प्रभादिचन्द्रं सुकविं प्रवन्दे ॥८॥

श्रीपद्मनन्दी क्रमतस्ततोऽभूत् सद्भव्यपद्मप्रविकाससूरः ।
तत्पट्टके श्रीसकलादिकीर्तिः कीर्तिव्रजव्याप्तदिगंतरालः ॥८॥

पट्टे तदीये भुवनादिकीर्तिः तपोविधानाप्तसुकीर्तिमूर्तिम् ।
श्रीज्ञानभूषं मुनिपं तदीये पट्टे प्रवंदे विदितार्थतत्त्वम् ॥१०॥

पट्टे तदीये विजयादिकीर्तिः कामारिनिर्नाशनलब्धकीर्तिः ।
तदीयपट्टे शुभचन्द्रदेवः कवित्ववादित्वविधानदेवः ॥११॥

सुमतिकीर्तिरभूद्वरतत्पदे सुमतिसद्वृषदेशनतत्परः ।
सुगुणकीर्तिरिहास्य पदे वरे जयति सूरिरनेकगुणोत्करः ॥१२॥

तत्पट्टे वादिभूषाख्या विद्यते वदतांवरः ।
कर्णाटे यन्नृपैः पूज्यो जैनैर्जयतु मद्गुरुः ॥१३॥

तच्छिष्यो ज्ञानकीर्त्याख्योऽहं सूरिपदसंस्थितः ।
करिष्ये चरितसारं यशोधरमहीपतेः ॥१४॥

दोर्दण्डचण्डबलत्रासितशत्रुलोको रत्नादिदानपरिपोषितपात्रसंघः ।
दीनानुवृत्तिशरणागतदीर्घशोकः पृथ्व्यां बभूव नृपतिर्वरमानसिंहः ॥१५॥

दोर्दण्डचण्डबल त्रासितशत्रुलोको रत्नादिदानपरिपोषितपात्रश्रोघः ।
दीनानुवृत्तिशरणागतदीर्घशोकः पृथ्व्यां बभूव नृपतिर्वरमानसिंह ।१६।

तस्य क्षितीश्वरपतेरधिकारि [वर्गः] श्रीजैनवेश्मकृत[दुर्लभ] पुण्यधारी ।
यात्रादिधर्मशुभकर्मपथानुचारी, जैनो बभूव वनिजां वर इभ्यमुख्यः ।१७।

खण्डेलवालान्वय एव गोत्रे गोधाभिधे रूपसुचन्द्रपुत्रः ।
दाता गुणज्ञो जिनपूजनेन्द्रो सिवारिधौतारिकर्दबपंकः ॥१८॥

रायात्कुबेरं मदनं स्वरूपेणार्कं प्रतापेन विधुं सुसौम्यात् ।
ऐश्वर्यतां वासवमर्चयापि तिरस्करोतीह जिनेन्द्रभक्तः ॥१९॥

नानूसुनामा जगतीप्रसिद्धो यो मौलिबद्धावनिनाथतुल्यः ।
स्ववंशवाताध्वविकाशसूरोऽस्यप्रार्थनातो क्रियते मयैतत् ॥२०॥

इत्थं जिनेन्द्रागमसद्गुरून् वै प्रणम्य भक्त्या चरितं पवित्रं ।
वक्ष्ये समासेन यशोधरस्य राज्ञो जनन्या सहितस्य चित्रं ॥२१॥
श्रीसोमदेवैर्हरिषेणसंज्ञैः श्रीवादिराजैश्च प्रभंजनैश्च ।
धनंजयैर्यत्कविपुष्पदन्तैः श्रीवासवाद्यैरिह सेनसंज्ञैः ॥२२॥
प्रकाशितं गद्य-सुपद्यबंधैः संक्षेपविस्तारसुगूढभावैः ।
न्यायागमाध्यात्मविशिष्ट-शब्द-शास्त्राब्धिपारं प्रगतैर्महद्भिः ॥२३॥
कवीश्वरैर्वादिभिरप्यजेयैर्वागीश्वरैर्जीवगुरुप्रतुल्यैः ।
मया कथं तद्गदितुं प्रशक्यं स्वल्पेन बोधेन विशिष्टभावं ॥२४॥
तथापि तद् गुण-ग्रामस्मरणार्जितपुण्यतः ।
स्तोकं सारं प्रवक्ष्यामि स्वस्य शक्त्यनुसारतः ॥२५॥

× × × ×

अन्तभाग :—

चंपादिपुर्याः सविधे सुदेशे बंगाभिधासुन्दरतां दधाने ।
ख्याते पुरेऽकच्छ(ब्ब)रनामके च चैत्यालये श्रीपुरुतीर्थपस्य ॥५७॥
श्रीमूलसंघे च सरस्वतीति गच्छे बलात्कारगणे प्रसिद्धे ।
श्रीकुन्दकुन्दान्वयके यतीशः श्रीवादिभूषो जयतीह लोके ॥५८॥
तद्गुरुबन्धुभुवनसमर्च्यः पंकजकीर्त्तिः परमपवित्रः ।
सूरिपदाप्तो मदनविमुक्तः सद्गुणराशिर्जयतु चिरं सः ॥५९॥
शिष्यस्तयोर्ज्ञानसुकीर्तिनामा श्रीसूरिरत्राल्पसुशास्त्रवेत्ता ।
चरित्रमेतद्रचितं च तेनाऽऽचन्द्रार्कतारं जयताद्धरित्र्यां ॥६०॥
शते षोडशएकोनषष्टिवत्सरके शुभे ।
माघे शुक्लेऽपि पंचम्यां रचितं भृगुवासरे ॥६१॥
राजाधिराजोऽत्र तदा विभाति श्रीमानसिंहो जित-वैरिवर्गः ।
अनेकराजेन्द्रविनम्यपादः स्वदानसंतर्पितविश्वलोकः ॥६२॥
प्रतापसूर्यस्तपतीह यस्य द्विषां शिरस्सुप्रविधाय पादं ।
अन्याय-दुर्ध्वान्तमपास्य दूरं पद्माकरं यः प्रविकाशयेच्च ॥६३॥

तस्यैव राज्ञोऽस्ति महानमात्यो नानू सुनामा विदितो धरित्र्यां ।
सम्मेदशृंगे च जिनेन्द्रगेहमष्टापदे वादिमचक्रधारी ॥६४॥
यो कारयत्तत्र च तीर्थनाथाः सिद्धिंगता विंशतिमानयुक्ताः ।
तत्प्रार्थनां च संप्राप्य जयवंतबुधस्य च ।
आग्रहाद्रचितं चैतच्चरित्रं जयताच्चिरं ॥६६॥
श्रीवीरदेवोऽस्तु शिवाय ते हि श्रीपद्मकीर्तीष्टविधायको यः ।
श्रीज्ञानकीर्तिप्रविवंद्यपादो नानू स्ववर्गेण युतस्य नित्यम् ॥६७॥

इति श्रीयशोधरमहाराजचरिते भट्टारकश्रीवादिभूषणशिष्याचार्यश्रीज्ञान-कीर्तिविरचिते राजाधिराज-महाराज-मानसिंह-प्रधान-साह-श्रीनानूनामांकिते भट्टारकश्रीअभयरुच्यादि-दीक्षाग्रहणस्वर्गादि-प्राप्तिवर्णनो नाम नवमः सर्गः ॥

परिशिष्ट

१

जैनग्रन्थप्रशस्ति संग्रहके ग्रन्थ और ग्रन्थकार

२

प्रशस्ति संग्रहमें उल्लिखित संघ, गण और गच्छ

———

प्रशस्ति संग्रहमें उल्लिखित ग्रन्थ

४

उल्लिखित वंश, अन्वय, गोत्र और जाति

५

उल्लिखित देश, नगर, ग्राम, राजा और पर्वत

६
प्रशस्तिसंग्रहमें उल्लिखित जिनालय तथा पर्व आदि

७
प्रशस्तिसंग्रहमें उल्लिखित देवी-देवता

प्रशस्तिसंग्रहमें उल्लिखित आचार्य, भट्टारक और विद्वान्

६

प्रशस्तिसंग्रहमें उल्लिखित राजा और राजमंत्री

१०

प्रशस्तिसंग्रहमें उल्लिखित श्रावक और श्राविका